ता। तथाचयमणिः। कर्णेविभेमुदिराहरेवीणायचेहरिणीति॥ ६७॥ प्रकटयतीति। निंदास्तोत्रंस्तुतिस्तोत्रंस्तुतिर्निंदा
स्तुतिर्नुतिंस्तुतिमपिप्रकटयतिचेन्हिंव्याजस्तुतिः स्यात्। तदुक्तं। कुवलयानंदे। उक्तिर्व्याजस्तुतिर्निंदास्तुतिर्निंदयोरिति

प्रकटयतिनिंदास्तोत्रंस्तोत्रंचनिंदास्तुतिंश्चेत्। नुतिमपिचसैकट्टस्तव्याजस्तुतिः पंचधातः॥ विन
रसिचयस्यात्मायोगंदाद्दशात्माश्रितोहिः। समवतिमदः कलेनाशेसोमलतागोष्ठिपयं॥ ६९॥ ॥

यत्रान्यगतस्तुतिर्विवक्षयान्यस्तुतिः क्रियतेतत्राप्यव्याजस्तुतिरेवेतिचः साव्याजस्तुतिः एकोवाद्वौवाएकद्वाः संख्याव्यय
सन्नाद्रेत्यनेनबहुव्रीहिः। बहुव्रीहौसंख्येयेऽजिस्यनेनसमासांतोऽच्प्रत्ययः। तेषुतिष्ठतीतिएकद्वस्थाएकविषयाभि
धिषयावास्तिः। अतः कारणात्पंचधाभवति। एकस्यैवनिंदयास्तुतिः स्तुत्यानिंदाचेतिद्वौभेदौ। एकस्यनिंदयातदन्यस्य
स्तुतिः एकस्यस्तुत्यातदन्यस्यनिंदाचेतिद्वौभेदौ। एकस्यस्तुत्यातदन्यस्यस्तुतिरित्येकोभेदइत्थंपंचविधाव्याजस्तुतिः
। क्रमेणोदाहरतिविनरसीति। यस्यारेः आत्मनः शरीरस्ययोगंयोगाभावंवियोगमित्यर्थः। विनरसिददासिसोरिः दादशा
त्मनः शरीराण्याश्रितोभवतिनान्योदासुरेषेतेनषमदोगर्वः कः। अत्यत्यागशौरेरुदारशरीरनाशंकरोषिसैरिर्युद्धेमृत्वादादशात्मा शरीरयोगोभ
वतीतिनन्वाश्चर्यमितिगर्ववदसीतिनिंदाव्याजेनयस्यशरीरनाशंकरोषिसैरिर्युद्धेमृत्वादादशात्मासूर्यस्तमाश्रि

यथारामापेक्षयाचरितमुत्तममुत्तमंश्रीर्हरेतिदुर्दमवंरविनुंभूतीयत्।

तोभवति। एवंचधार्मिकेणत्वयासंरंभेणशत्रवोयुद्धेभिमुखाएवहताः अतः सूर्यमंडलभेदिनोभवंतीतिस्तोषेणस्तुतिर्व्यज्यते। त
थाचस्मर्यते। द्वाविमौपुरुषौलोकेसूर्यमंडलभेदिनौ। परिव्राड्योगयुक्तश्चरणेचाभिमुखोहतइति। यस्यनिंदातस्यैवस्तुतिरित्ये
कविषया। मुक्ताकरोप्यपिजडत्वकोविवेकः। नगणभगणनगणमगणतगणदयगुरुद्वयानिञ्छिषट्सुचतुर्षुयतिश्चेत्सइ
स्यात्। तदुक्तंयमणे। द्विजजलधरोदंर्णामेघोपमुक्तंचषड्दिशि॥ ६६॥ भोकेति। हेसच्छात्रसच्छिष्यगुरुमेविनागुरोरा
देःपुरस्तात्मोक्षाभोजनंकुर्वतात्वयाजनिसत्। अतिशयेनशुभंकृतं। अत्रस्तुतिर्व्याजेनगुर्वाज्ञायायत्किंचिदवज्ञिष्ठंत
दस्यमितिविधिस्तंत्यक्त्वानतुपुरस्तान्मोजनंकर्तारंत्वांधिगितिनिंदागम्यते। यस्यस्तुतिस्तस्यैवनिंदेत्येकविषया। विज

अत्रयस्यनिंदातस्यैवस्तुतिः। मोक्षाभक्षाघटनमतिसत्त्वयागुरुसेविना। गुर्वोर्दोषिविजयमपियोनिजा
यंरेरेवस्तात्॥ कर्णादीनूधनयदहनुयतिर्भवाब्धिंविनाछेत्तुः। मागाकोनाभ्यनरसलभाः समुद्रंरिपुद्विडा॥ ६९॥

यमपिविजयंजलकमजुनमपिविकूर्योरेभगवोबलात्कर्णभादिर्येषांद्रोणभीष्मादीनांतान्निजायजितवान्। जयतेर्हि
हसनूनिदोर्जेरितिकुत्वं। इतरथाक्यस्तुयछदःपूर्ववाक्यस्थनछंनापेक्षतइतिनछदाप्रयोगः। अत्राजुनंनिंदयाईश्वरानु
कूल्याभावेपिप्रबलानांकर्णादीनांस्तुतिव्यज्यतेइतिभिन्नविषयाइतुभवः संसारएवदुस्तरत्वाद्धिः समुद्रस्तेनविना
छेत्तुः विकल्पेछेत्तोयतिः संन्यासीधन्यः। अत्रयतिकृत्यासंसारदुःखेननिर्विण्णस्यात्मनोनिंदाव्यज्यतेइतिभिन्नविषया। म
गणभगणनगणरगणसगणजघुगुरवः समुद्रेषुचतुर्षुरिपुर्षुषट्सुचछिदायतिश्चेत्तर्हि भागाकोना। तदुक्तंचैव। भाग
कोनाक्षिपदविधींद्रयचिताघचेरिति॥ ६९॥ किमिति। अयंनापुरुषः प्राक्पूर्वजन्मस्किंनयः अकृतअकरोत्। यतोगं
गायांभागीरथ्यांमज्जतिस्नाति। अतस्तानृपुरुषस्तत्वाबहुजन्माकृतसकृतफलंगंगासमागमोवेकुंठादिवदितिगंगास्त

Dr. BHAU DAJI MEMORIAL

१० चेद्दहसिद्धमेवविहिनेसरासिकेनविना।तर्हिविधिर्मेवेत्यनियमेनविधिर्नृपनृपतेः॥श्रोतरिश्रोतुरुपोभवतिवेबुधउरगपतिःवक्तिचिवंशपत्रपतिनंभरनमनलगयुक्॥९॥

निर्व्यजनेति।एवंपंचविधाव्याजस्तुतिरुदाहृता।व्याजनिंदास्तुतिभेदेति।यद्दहिनिंदानिंद्यप्रकटयतितदाव्याजनिंदास्यात्।तदुक्तं।निंदायानिंदयाव्यक्तिर्व्याजनिंदेतिगीयतइति।हेखलमेघिनाशंकुरुतेतवदोषःकः।इदंयस्तुत्यर्थमेश्वर्यप्रमुखंददतेस्मदत्तवान्समृणोगर्व्वोनिंद्यःददतेइतिदददानेइतिभोवादिकस्यलटिरूपं।अत्रप्रभुत्वदातृनृपनिंदयासर्वलोकुःखदातुःखलस्यनिंदाभिव्यक्तिःप्रत्येवनिंद्यमिदंकस्यवदोषगणव्यक्तीःससर्जनिजविस्मृतिकारिणीत्यो।नगणसगणमगणभगणनगणलघुगुरुवश्चेतहिरोहिणीस्यात्।जत्रैवषड्भिश्चतुर्भिश्चयतिरयुक्ता।तथाचरत्नमणिः।द्विजवरयतिनोकर्णैर्वीर्णेषट्सागरैरोहिणीति॥९॥चेदिति।इहसरसिकेनसाहित्यशास्त्रज्ञेनविनासिद्धमेवकिमधिगमःकृतेतिशेषः।विहित

अत्रभोश्चेत्यादिभिर्व्यस्तुतिःनस्येवनिंदा।धिगित्यादिभिःअर्जुननिंदयाकर्णादिस्तुतिः।धन्यइत्यादिभिःयतिस्तुत्वा संसारिनिंदा॥किमकृततपःप्राङ्नायंगंगायांयतोमज्जनि।प्रकटयतिनिंदांनिंदायाव्याजनिंदातदास्यस्तुरुविनाशंमे कलेदोषःसगर्व्योनृपोयद्दहदत्तेमेश्वर्यंनेसोभोद्यगारोहिणी॥९॥किमित्यादिभिःस्तानृस्तुत्यांगंगास्नानेकिमितिपंच धाव्याजस्तुतिः॥॥चेनहिंविधिरलंकारोभवेत्॥तदुक्तं।सिद्धस्यैवविधानंयतदाहुर्विध्यलंकृतिमिति।हेनृपनृ पतेरत्रजेइसष्टुवेनरिज्ञानरिश्रोतरिचसतियोबुधःसबुधोभवतिअत्रबुधस्यबुधस्यविधानमनुपपन्नंसर्वज्ञतावल्ल क्षणातिशयशालिनयासकलजनमान्यस्यंगमःकरोतिनत्रनृपतेःसकेवलरिश्रीश्रोतरीत्यनेनप्रकटीकृतं।यथावा।म र्त्याजज्ञानविमहार्घकरास्त्रभन्यामुक्ताऊरोधिकमलेष्यसिविश्वमाला।उरगपतिःपिंगलनागः।भगणरगण भगणनगणलघुगुरुभिर्युक्तंयत्रभिदशसूत्रयत्यासहितंछंदोवंशयत्रपतितंवक्ति।तदुक्तंरत्नाकरे।दिङ्मुनिवं शयत्रपतितंभरनमनलगेरिति॥९॥इत्यत्यष्टिः॥॥अथाष्टादशाक्षरपादजातौधृत्यामालेपालंकारादिन्नि

रूपयन्निहविस्मूर्जितंलक्षयति।स्याद्यत्रेति।यत्रसेनोक्तस्यवचनस्यविचारात्प्रतिषेधःस्यात्।तथायत्रनिषेधस्याभासो पिस्यात्।एवंयत्रविधेर्व्यक्तिःप्राकल्पितनिषेधश्चगुप्तःस्यात्तेनहेतुनासेपोलंकारःस्यात्॥तदुक्तं।आक्षेपःस्वयमुक्तस्यप्रतिषे धोविचारणात्।निषेधाभासमाक्षेपंबुधाःकेचनमन्वते।आक्षेपोन्यादिधीव्यक्तेप्रतिषेधेतिरोहितइति।त्रिविधमाक्षेपक मेणोदाहरति।हेभगवन्मुनिंदेहिमाथवाब्रह्मनमुनिंनोदेहिनवभक्तिंदेहि।अत्रमार्गितमुनिदानस्यनइतिसतेनानर्थक्य विचार्यनवेत्यादिनाप्रतिषेधः।जेहरामोनअधिनुजेरोज्ञोयमोमि।अत्रयाहिलननसमयेसुखीवंमतिरामोक्तोनाहंन इतिनिषेधोबाधितत्वादाभासरूपोयुद्धकालोचितमयोत्साहकत्वपदवचनपरिहारेणयथार्थवादित्वेपर्यवस्यन्नदानींवा

इत्यत्याष्टिः॥अथधृतिः॥स्याद्यत्रसेनोक्तस्यप्रतिषेधश्चेद्विचारात्तानिषेधाभासोप्येवंयत्रविधेर्व्यक्तिर्नि षेधश्चगुप्तः॥तत्राक्षेपोमुक्तियमोहंनरामोरोहिणेमस्त्वम्येवाहंशिवोमोक्षोसिहविस्मूर्जितंयो॥९॥हेतुः स्यात्पूर्वपूर्वप्रतियोनरोनरंकारणमालावेपरीत्येनकथितानुविधयामागुरोः॥संतोषात्सोम्यसेवानदृढजाय तेमनोसंगतोभक्तिर्भवत्यविद्यास्मदिदंमर्भजाह्यिकांचीपुरे॥९॥॥लिहनेनेत्यादिकोमाकुर्वितिविशेषमा क्षिपतीत्याक्षेपालंकारः।तत्रमेहिदृशाचुरत्नमहंएवंभगछाम्येवेतिशाचुदेशप्रस्तावितमन्यकस्यचिदुक्तिः॥अत्रएवंतिषि धिर्व्यक्तौनेमीतिनिषेधोगुप्तःसनाशमूचकेनगमनीयदेशाचुमद्भावकथनेनगभङ्गतः।भगणदृयंभगणमगणोयगणदृयं चेदिपंचमविषदृरूपनिश्चयेनहिसिंहविस्मूर्जितंस्यात्।इदंकचिद्दृश्यतेपुस्तकेदृश्यते॥९॥हेतुरिति।यदापूर्वपूर्वप्रत्यनरोनर वस्तूंवेपरीत्येनवाउत्तरोत्तरंप्रतिपूर्वपूर्ववावस्तुहेतुःकारणंस्यात्तदाकारणमालानंसरःस्यात्।तदुक्तं।शुक्लःकारणमाल्यास्याद्य थापाकुप्रपाकरणेरिति।क्रमेणोदाहरति।कविनेति।कविनाकाव्यकर्तृनंदिताजायतेमविद्यागुरोःसंतोषात्समाहाज्जायते

समंतोषोस्यगुणोमेवानःसेवयाजायते।अत्रपूर्वपूर्वंप्रत्यनंतरोत्तरस्यकारणता॥इहसतांसंगतःसंगेनभक्तिर्जायतेभक्त्याचित्तशु
द्धेजस्याश्चितःसमूलब्रह्मज्ञायतेज्ञानेविभवति।अत्रोत्तरोत्तरंप्रतिपूर्वपूर्वस्यकारणता।मरभजगणाररणहयंचदिएकादशयति
श्चेत्तर्हिकांचीस्यात्।तदुक्तंक्रमणेा।कांचीरुद्वैर्यतिःशशुगरुडैगजांचुंबोरदयमिति॥९॥ललितमिति।इहयःप्रस्तुतेधर्म
णिप्रस्तुतोर्थोवृत्तोक्तोस्तिनंविहायतदन्येनतस्मिन्प्रस्तुतधर्मिण्येवानुनाप्रस्तुतार्थेनसमंचमत्कारंप्रतिबिंबभूतमर्थंवृत्तोक्तमाहुर्यदि
तदानर्हिललितंस्यात्।तदुक्तं।प्रस्तुतेवर्ण्यवृत्तोक्तप्रतिप्रतिबिंबस्यवर्णनमिति।अयंपुरुषउदक्षमितेगृहेस्निग्धाग्रहिलेसतिषा
धिकोवापीसंकीर्यतिसम्यक्कर्तुमिच्छति।अत्रबहुसैनिकैःसहबलवतिशत्रौयुद्धार्थमागतेसतिनिजस्वयेधनेनभगनजयितु

ललितमिहविहाययःप्रस्तुतेप्रस्तुतोर्थोस्तिनंयदिसममनुनाचतदन्येणवार्थेमाहुस्तदा।अयमुदक्षमितेप्रदीप्तेग्नि
नाधिकोसंकीर्यतिकथयतिनोरोरोवर्हिरुद्विदंतारकं॥९॥अर्थश्चेदुक्तंहितइहविनाप्रयत्नमपिप्रमिद्धेत्रे
दर्थाश्चोरुरसिलषितात्महर्षणमीरितं॥कोयानंमेदस्वपनहृतुकश्चालयुक्तंजयीछनदुग्धेमाणोमतनजभराचडिंडि
कुरंगिका॥९५॥ ॥मिश्रंतंकंचिदाजानमुद्दिश्यतत्त्वापारमतिबिंबभूतसदृशःसंदीप्तभवनद्गोत्यर्थवापीस्वननेऽवणे
नासुलिनंवर्ण्यमानेप्रस्तुतवृत्तोक्तेविशेषणानांसाधारण्येनसारूप्येणवाऽप्रस्तुतवृत्तोक्तस्तूत्यभा।वात्तनसमासोक्तिःप्रस्तु
तधर्मिकत्वानेयमप्रस्तुतप्रशंसा।अहिःपिंगलनागोनगणहयंरगणश्चतुष्टयंचचेत्तर्हिचत्वारिंशदक्षरयतिर्यस्यासौतारकं
कथयति।तदुक्तंनैव।डविरतिरितिनहयादक्षिरैकैःप्रहिष्टनिशा।तारकेत्यन्यदृति॥९४॥अर्थइति।इहप्रयत्नेविनापिउक्तं
हितःउक्तंवाविषयेपार्थःप्रसिद्धेश्चेनयाभिस्तथिनाहर्षोभिनाहर्षात्सदार्थादुरुलम्बादधिकोर्थःसिद्धेश्चेन्नहिप्रहर्षणमीरितंक
थितं।तदुक्तं।उक्तेहितार्थसंसिद्धिर्विनायत्नंप्रहर्षणं।वांछितादधिकार्थस्यसंसिद्धिस्त्वप्रहर्षणमिति।क्रमेणोदाहरति।

कइति।इहयक्षधामक्षयात्स्वपतेनिद्रांकुर्वतेमेमत्कांतःपुरवोनमदान्हरतवान्।अयक्षधामन्यग्लान्यात्स्वपतेपत्यंविनान्य
प्राप्तिःस्यादेव।तयुतंस्वर्मंचकांत्यपिष्टपिकासल्लोदकमपीछनदुग्धेप्राप्तः।तदुक्तंनैव।गुर्वुःपयोकोंगारमुनिविरामयु
क्तकुरंगिकइति॥९५॥इदामिति।यस्यफलस्यस्वरूपायत्नस्यसिद्धिरर्थः।नयोजनंयस्यतस्मात्प्रयत्नात्फलंभवेत्तेनसिद्धिर्दं
प्रहर्षणंस्यात्।तदुक्तं।यत्नादुपायसिध्यर्थात्साक्षात्फलस्यचेति।ज्ञानसिध्येज्ञात्मज्ञानमोमुक्तिरमीशोभनपुरुषःअ
स्माद्भजनान्मुक्तिमीक्षंगतःप्राप्तःअत्रमुक्तिरूपफलप्राप्त्यर्थंतदुपायभूतात्मज्ञानसिध्यर्थमीश्वरंभजनंतद्भजनादेवमुख्यु
पायज्ञानसिद्धिमंतरेणमुख्यमुक्तिफलंलभ्यइतिविषादनंलक्षयति।विषादइति।यदाहृष्टस्येप्स्यमाणस्यार्थस्यविरुद्धोर्थःसि

द्दत्कुतोपायसिध्यर्थयत्नात्फलंतद्भवेत्तेन।विमुक्तिर्गतोमुक्तिरज्ञानसिध्येभजनीशमात्मान्॥विषादोय
द्देहस्यसिद्धौविरुद्धोर्थआर्तंसजीवंयतीहामृतात्सोरसेःकीडयाचिह्नितश्चंद्रमाःस्यादितिश्लेषः॥९६॥कथयतिगुणदोषाभ्या
मेकस्येहतोचेत्परस्यापिकविरहविपर्यासाद्वोहुसामानिमज्जन्मनोधः॥वरइहबहुनामायुःस्वेष्टसंतोर्थनोदातृक
र्णारिषुविधिमतिनिंदतिछूपैर्नोमोयथोचंद्रमाला॥९७॥ ॥इहतदाविषादोविषादनमलंकारःस्यात्।तदुक्तं।इष्य
माणविरुद्धार्थसंप्राप्तिरत्रविषादनमिति।इहान्तरोगिणंसजीवयतिसतिवैद्येइतिश्लेषः।अत्रसोरोगीअमृतमृतःतत्रेष्यमाण
रोगिजीवनविरुद्धमृतिसिद्धिः।रसेःषड्भिर्यःगणैःछन्दसांकीडयाचिह्नितश्चंद्रमाःस्यादित्यर्थः।तदुक्तंनैव।यदायूतिदाक्षी
तिःकीडयाचिह्नितश्चंद्रमास्यादिति।अत्रचंद्रमास्यइत्यत्रसंहिभिरित्यः॥९८॥कथयतीति।कविरिहैकस्यगुणदोषाभ्याम
परस्याधिक्योगुणदोषोकथयतिचेदथवाविपर्यासाविपर्यादधिकोदोषगुणोकथयतिचेत्तर्हितुल्यालंकारःस्यात्।तदुक्तं
कुवलयानंदेयत्रकस्यचिद्गुणेनान्यस्यगुणोदोषेणगुणोवावर्ण्यतेसउल्लसइति।क्रमेणोदाहरति।निमज्जन्निति।दिवोनदीक

नदीगंगानस्यादिवउदित्यकारादेशः।निमज्जनस्नानंकुर्वन्नरेश्वरःश्रेष्ठःअत्रगंगायाःपवित्र्यगुणेनतस्यांनिमज्जनसःपुरुषे श्रेष्ठ्यगुणोवर्णितः।अर्थिनोयाचकाःसेवकाआसन्नमायुःदानृषुकर्णादिषुदुःखेनतःसंतोविप्रेब्राह्मणमतिनिंदंति।अत्रहरि यदुःखपरिपंथिचिरजीवितादोषेणास्मत्कस्यायुस्समसृष्ट्याप्यपैकर्णादिषुनसृष्टवानितिहेतुर्व्यंग्यस्तेनदोषोवर्णितः।नगणद्वय मगणद्वयंयगणद्वयंचेत्तेःसप्तभिःपैश्चनुर्भिर्यतिश्चेतर्हिचंद्रमालास्यात्।तदुक्तंनंदेव।।मुनिजलधियतिर्नोमौयोचेद्दि नाचंद्रमालेति।।९।।निषेवतइति।यःशिवंनभजतिअसौनिंद्यः।अत्रशिवमहिमगुणेननरस्यतद्भजनंदोषोवर्णितः।नरेण सर्वकलमांसंयदब्धौसमुद्रेनमग्नइति।अत्रसमुद्रस्यदुष्टजंतवादियुक्तत्वदोषेणतस्मिन्मोक्षिकायर्थेप्रविष्टस्यनिमज्जने

निषेवतोयोननुभजतिशिवंसर्वमांसंकलयन्नेष्मनाओनमवतद्दहचेनोतुतास्यामवज्ञा।।मंदःप्रा
प्तोत्यपिपरमगुरोर्ज्ञानमन्यंरवेकाशानिर्मलेनशशिनिधिमभनाश्चंद्रलेखाहितीयो।।९।। ।।

विनावहिर्निर्गमनंगुणत्वेनवर्णितं।एवमुत्तमस्योदाहरणानिनिरूप्येदानींमध्यंलक्षयतीमेति।इहैकस्यनाश्यागुणदोषा भ्यामन्यस्यतोगुणदोषानभवतश्चेतर्हिअवज्ञालंकारःस्यात्।तदुक्तं।ताभ्योतोयदिनस्यातामवज्ञालंकृतिस्त्वसौति।मंदःप रमगुरोरपिअत्यंज्ञानंप्राप्नोतिअत्रशिष्यस्यश्रेष्ठगुरुनिष्ठसर्वज्ञात्वभावोण्यगुणस्यालाभः।शशिचंद्रेरुद्धानेसतिरवेः कालानिः।अत्रप्रातःकालेमहानेजस्विनश्चंद्रस्यग्लानिदोषेणसूर्यस्यरोभाविरहदोषाभावोवर्णितः।मभमगणायगण त्रयंचेच्चतुर्षुतेमतसप्तभिश्चेतर्हिचंद्रलेखा।तदुक्तंकश्चमणो।मत्तेभोथिजलधिमुनियतिःकीर्तितावंद्रलेखेति। ९।।स्वाध्यमिति।इहस्वाध्यंवृत्तंचरितमन्यस्यांगप्रोक्तंचेतयाऋद्धिःसमृद्धिश्चरितमित्यर्थः।अन्यांगकथितावेतर्हिस्वान मलंकरणमुक्तं।तदुक्तं।उदितमृद्धिसहितंस्वाध्यंचान्योपलक्षणमिति।यस्योयस्यसानो।स्नुःप्रस्तुःसानुरस्त्रियामित्य

मरः।ओर्यस्योऽमामहेश्वरोअयंनरपश्चरनुःचक्रनुःसोयंश्रेतोहिमाचलेविराजतेइतिश्लोषः।अत्रस्वाध्यचरितस्यदेवचरितो गत्वंयस्याःवर्त्मसुमार्गेषुमुक्तानांहीराणांचयाःसंघाःसमार्जिन्यासंकरसेपिण्यानीयंतेदूरतःक्षिप्यंतेमार्गेमार्जकैरितिश्लेषः मायोध्यानुरक्तस्तुअत्रसंपन्नरितस्यायोध्यानगरीचरितोमत्तं।मगणद्वयंममसमगणाश्चेन्मंजीराकथिता।तदुक्तंनंदेव ।।मोमोसोसःसोमोयत्रहिसास्यातांविबुधैर्मंजीरेति।।९।।स्वभावइति।इहजात्यादिरुक्तःस्वभावोगर्हितश्चेतर्हिस्वभा वोक्तिःकथिता।तदुक्तं।स्वभावोक्तिःस्वभावस्यजात्यादिरुक्तस्यवर्णनमिति।दीर्घाःशुनानतनुःशरीरंयेनसःतस्यैसकवलनीय मृगरूपलक्ष्येणकंकेवलंचनुर्यस्यसःएकेमुख्यान्यनेकेषुलक्षेसमरःक्षितौपृथिव्यांलीनोमोद्दीपीव्याघ्रःतृणानिकवलयति

स्वाध्यंवृत्तंचेदन्योगमिहमोक्तंकथिनाचेदर्हि।चोदातंतत्तंकंचरतुरयैर्नोनपद्यंचमो।।सोयंश्रेतोहिमाचलेविराजते मुक्ताहीरचयाधर्मसंमार्जिन्यानीयंतेमायोध्यापानुरमोभोसोकथितामंजीरा।।९।।स्वभावोजात्यादिरुक्तइहगदि तश्चेतर्हिकथिता।।स्वभावोक्तिर्दीर्घश्वसाननुरसोलक्ष्येकनयनः।।क्षितौलीनोदीपीतृणकवलिनंचेणीगण वृतेमृगाख्येतुंडीछलनिचियमोक्षीज्ञानमतमाः।।२००।। ।।तृणंकवलिनंहरिणीनांमृगीणांगणेवृतेवेष्टितंमृ गाख्यंमगश्रेष्ठंहरुसारंतुमिश्रतिहि।अत्रजंतुनातुकवलनपरव्याघ्रानवलिनहरुसारयोःस्वभावस्यवर्णनंयमनसत मगणाःचिचिषट्कयमकयतिश्चेतर्हिक्रीडास्यात्।तदुक्तंनंदेव।रसर्तुछिन्नेयंयमनसनसाःक्रीडानिगदितेति।।२००।। रमिकेति।यदियदारसिकेनकिंचिनानोकोकेरथोनरेणाल्पत्वसंपन्नंमुक्तंनरासाछेकोनिर्भवति।तदुक्तं।उक्तेवक्तियत्रन्यू कोक्तेःस्यादथोनरगर्भितेति।हेभूभृत्नगजनगतिहिजःपक्षीहिजस्यपक्षिणोगमनंमतिंनानीते।जानातेरनुपसर्गाद्देत्या त्मनेपदं।तस्यपक्षिगमनस्यज्ञानेनहीनोन्यानरोनवेत्ति।अत्रकेनचिद्राज्ञाकस्यचिन्नरस्यवृत्तांतपृष्टस्यसभीपस्थंकंचि

सुरवंदर्शयित्वायमेवनस्यवृत्तांतंजानातीत्युक्तवतःपक्षिणोगतिंपश्येवजानातिनान्योवेत्तीतीदंश्लोकद्वयानुकरणं॥अत्रच
दृतांतःदृष्टःसचायंचलोकप्रसिद्धेतेप्रपंचव्यापारेसहचारिणाविनिविष्टविषयतयालोकोन्यानुकरणस्यप्रयोजनेसति
दृश्येपिमदनव्यापारेचौर्यव्यापारेवायंसहरदनिमर्मोद्घाटनमथितेनहृतंनसगणाःस्युर्मगणद्वयेनयगणद्वयेनयुक्ता
षट्सप्तपंचसप्तिभिश्छेदयुक्तानंगलेस्वामता॥तदुक्तंनंदिनैव॥नसममययाषट्पंचाष्टाकीर्तिनागलेस्वति॥५॥कुर्युश्चेद
॥अत्राविरोधतःविरोधाभावातूहेतोःयुगपद्भावंयोगपद्यंभजतांधर्माणांकथनंकुर्युश्चेत्कवयइतिशेषः॥तर्हिसकविभि
समुद्भयइतिप्रोक्तः॥तदुक्तं॥बहूनांयुगपद्भावंभाजांगुणःसमुद्भयइति॥हेनृपतेतवगेहेगृहेजनिर्यःसदापिबंतिसंतिमोदं
रसिकत्वविनालोकोकेवर्त्यर्त्यतिरात्मत्वमुक्तंभवतिचतदछेकोक्तिःसाभूतार्थाद्भिन्नस्यद्विजोवै॥जगतिगमनंजानी
तेनान्योनज्ञानहीनोम्सममयययुक्ताषट्पंचछिन्नामतानंगलेस्वा॥५॥कुर्युश्चेदविरोधतोयुगपद्भावंहिभजतां
॥धर्माणांकथनंसमुद्भयइतिप्रोक्तःसकविभिः॥तर्हिहेनृपयःपिबंतिनृपतेस्वार्हिंतंचसदामोदंतेम्सजसाततोसौ
दयतिमछार्दूलललितं॥२॥ ॥तेनचअत्राविरोधेनानुमितंयोगपद्यानांमतिथिकर्तृकपानादिधर्माणांगुणेनक
थनेनम्सजसतसगणाश्चेतर्हिस्यातिमनूद्दाद्रसकथनिस्तत्कृतंशार्दूललालितंस्यात्॥तदुक्तंनंदिनैव॥दछिन्नंमसरज्जु
रत्नतकरैःशार्दूललालितमिति॥२॥एकस्मिन्निति॥इहएकस्मिन्विलक्षणेकार्येकुर्वतिसतिअन्येपिअहमहमिकयापरस्प
राहंहारेण॥अहमहमिकानुसास्यात्परस्परंयोभवत्यहंकारइत्यमरः॥एतत्कार्यंअचरंतिकुर्वंतिचेत्तर्हिअसौमुभय
एवेरितःप्रोक्तः॥तदुक्तं॥अहंप्रथमिकाभाजामेककार्यान्वयेपिसइति॥इहभूलोकेचौरत्वंदौष्ट्यंविटताजारत्वंक्रौर्य
चापिनूनंमनुष्याणांधनंपातेनरकंनयंतिप्रापयंति॥अत्रैकमेवचौर्यंनरकेनयनंप्रत्युक्तंतादृक्केवलदौष्ट्यादिक

मपितत्कारणत्वेनबुगपदवतरति॥मथनपररणेःयुक्तंरैश्चतुर्भिःछैःसप्तभिःछिद्यतेयुक्तंकेसरंस्यात्॥तदुक्तंनंदि
वाक्यंछिनत्तिशशिगरुदयुगंघछेयंतिःकेसरमिति॥२॥इतिधृतिः॥अथोक्तविशेषाक्षरपादजातावतिधृत्यांदृष्टांताय
लंकाग्निरूपयनशार्दूलविक्रीडितलक्षयति॥वर्ण्येति॥वस्तुतोभिन्नयोर्भिन्नयोःसाम्यतोसाम्यादभिन्नेनाभेदेनगृहीत
योःवर्ण्यावर्ण्यगधर्मयोःउपमेयोपमानवास्थगतधर्मयोःपृथगुपादानमितियत्सात्रिबंप्रतिबिंबतोक्तासात्रियदितर्हि
दृष्टांतालंकारउक्तः॥तदुक्तं॥चेद्बिंबप्रतिबिंबत्वंदृष्टांतस्तदलंकृतिरिति॥हेरानूहर्विष्णुरेवश्रीमानूत्तमेवमतिमान्॥सर्ववा
क्येसावधारणंभवतीतिन्यायेनेवकारस्यानुषंगः॥अत्रश्रीमत्त्वोधर्मयोर्बिंबप्रतिबिंबभावःवैधर्म्येणाप्यर्थेदृश्यते॥

एकस्मिन्कुर्वतिसतिविलक्षणेकार्येत्वन्यंतंहर्चेदेतत्त्वेपत्यहमहमिकयासावेवनहरितः॥चौरत्वंदौष्ट्यमपिचविद
नाक्रौर्यंनयंतीत्यत्रधःपातनंबुग्मनयररणेःछैर्यतिःकेसरं॥२॥इतिधृतिः॥ ॥अथातिधृतिः॥वर्ण्यावर्ण्यगधर्म
योःपृथगुपादानंमिथःसाम्यतोःभिन्नत्वेनगृहीतयोरभिन्नत्वंसाबिंबप्रतिबिंबतासियदि
सादृष्टांतउक्तोहरिःश्रीमांस्त्वंमतिमानूहिमम्सजसततागुरुशार्दूलविक्रीडितं॥५॥ ॥हृतेचगर्वाग्निमुखंमनस्त्वया
किमन्यदेवंविहतोश्वनोदिषः॥तमोसितिछंतिहिनावदंशुमान्यथाघदास्यात्कदयाद्रिमौलितामिति॥मसजसगणाः
नगणद्वयंगुरुश्चेद्वदनाकृतयतिश्चेतर्हिशार्दूलविक्रीडितंस्यात्॥तदुक्तंरत्नाकरे॥सूर्याश्वैर्मसजस्ततासगुरवः
शार्दूलविक्रीडितमिति॥५॥तत्रेति॥स्वसिद्धेस्वतःसिद्धेसेसकीयेगुणे॥स्वशब्दस्यसर्वनाम्नेपिपूर्वादिभ्योनवभ्यो
वेतिविकल्पात्सिद्धादेशाभावः॥इतरस्यपरस्यसान्निध्यात्औत्कृष्यमुत्कर्षश्चेतर्हितैर्वैरेनुगुणालंकारःप्रोक्तः॥
तदुक्तं॥प्राक्सिद्धस्वगुणोत्कर्षोनुगुणःपरसान्निध्येसतीति॥यःपुण्यवान्नरःकाशीनगर्यांस्थितःसनुचदुर्मतीन्सत्क

नीपुण्यवान्स्यात्। अथसतःसिद्धपुण्यगुणस्यस्वकीयेसंस्तवसम्बन्धिन्यादुत्कर्षः।सामान्यालंकारंलक्षयति।हेरिति।भेदेसत्यपिसाम्यात्यद्विशेषोनेक्षिनदृश्यतेनहिंतैःसामान्यमकधिकथितं।तदुक्तं।सामान्यंयदिसादृश्यादिशेषोमोपलक्ष्यतइति। एषाकामिनीव्रजतिषुलनासंनेक्षिनदृश्या।अत्रव्यक्तिभेदाभासेपिनानवमार्दवगुणसादृश्यादियमंगनाइमाव्रजतत्यद्वतिशेषानवगमः॥मीलितालंकारेसिसादृश्याद्व्यक्तिभेदास्फुरणं।अत्रव्यक्तिभेदस्फूर्तावपिसादृश्याद्विशेषानवगमः।मननसरगणाःनगणद्वयंगुरुश्चेतिःपंचभिःछैसप्तभिर्यतिश्चेतर्हिवंचितंस्यात्।तदुक्तंछन्दोमणौ।कर्णोमात्रानवहिजनाश्विगरुदारः स्वःखेरवैचिनमिति॥५॥विशेषइति।इहशास्त्रेइहाभेदाध्यवसायेकिंचिद्धेतुतःस्वल्पकारणाद्विशेषःभिदाभेदश्चस्फु

नर्हितैःप्रोक्तोनुगुणइतरसाम्याद्यस्मिंद्वेगुणेद्वौलक्ष्येचेत्सतुबहुसुकृतीख्यासुपुण्यवान्यःस्थितः॥का श्यांहेतोःसामान्यमकथिहिविशेषोनेक्षिभेदेपिचेत्साम्यान्नेस्येषाव्रजतिषुमतनाहूछैःस्तोतमोवचितं॥५॥विशेषःकिंचिद्धेतुतइहभिदाचस्फुरेचेद्विशेषःकसंज्ञःप्रोक्तोत्रैगदितमिहचोन्मीलितंधूमतोग्नेः॥प्रतापाग्नेर्व्याप्तेस तिजगतितेवेत्यशूरंचशूरंसवेदजोचेन्मैवंयमनसररामेघविस्फूर्जितागः॥६॥ ॥रेअनर्हितैःक्रमाद्विशेष कइतिज्ञायस्यसोलंकारःप्रोक्तःउन्मीलितमलंकरणंचगदितं।तदुक्तंमैवंविशेष्ययोःस्फुनावुन्मीलितविशेषकविति॥ हेराजन्व्रजगतितेप्रतापाग्नेर्व्याप्तेसतिधूमतोधूमात्अग्निंवेतिजानाति।जमदग्निरिशेषः।अत्रविसंप्रदायात्प्रतापाग्नि लौकिकाग्न्यभेदाध्यवसायेप्रमेधूमाद्धेतोर्लौकिकाग्निज्ञानाविशेषकः।सराजाअसौसंग्रामेशूरमशूरंचवेदवेत्ति।वि शेलटोवेत्तिवेत्तेलटःप्रथमपुरुषैकवचनस्यणलादेशः।अशस्त्रंपाणिनेनशूराशूरभेदास्फूर्तौसंग्रामसमयेभेदज्ञा नादुन्मीलितं।सामान्यालंकारप्रतिद्वंद्वीविशेषकः।मीलितप्रतिद्वंद्व्युन्मीलितमितिविवेकः।यमनसररगणा

गुरुश्चेच्चेषड्भिर्दिग्यतिश्चेतर्हिमेघविस्फूर्जितास्यात्।तदुक्तंरत्नाकरे।रसर्त्वब्धेर्योःसोररगुरुयुतामेघविस्फूर्जिता स्याद्दिति॥६॥तदिति।इहयद्दिग्यदारभिककविःअद्भुतान्यतथानिअसत्यानिविशेषोदार्यादीनिभवदतिब्रूतेनहितदात्मु क्तिःस्यात्।तदुक्तं।अत्युक्तिरद्भुतानथ्यावेशोयौदार्यादिवर्णनमिति।हेनृपतेदेवादित्यावनवप्रतापाग्निनांस्मापृथ्वी विसमृजुः।अत्रवेशोयात्युक्तिः।हेनृपतेइहलोकेस्वर्वृक्षाःकल्पवृक्षास्तोषितायेर्थिनोयाचकास्तानाश्रिताःस्यु॥अत्रौदा र्यात्युक्तिः।संपदत्युक्तावुदात्तालंकारःवेशोर्थाद्यत्युक्तावयमितिभेदः।अनिशायात्तयोःसदसदुक्तिनारतम्येनभेदःमत ननसररगणागुरुश्चेषड्भिर्वाहैःसप्तभिर्यतिश्चेतर्हिस्यादंपुष्पदामस्यात्।तदुक्तंछन्दोमणौ।होकर्णोधर्मःसाश्विघनजलदाः

नर्ह्यत्युक्तिःस्याद्यस्किंकविरिहनाद्भुतावेशोर्थादार्यादीन्वर्णयतिनृपतेत्वत्प्रतापाग्निनप्तां॥स्यादेवोदेत्यावि समृजुरितिनाथ्याश्रिताःस्युःस्ववृक्षास्तोस्तोरररगुरवइदंपुष्पदामेषुवोहैः॥७॥तदेवंहेतुस्वरूपविचारमिति यदिभूतस्यार्थस्यभाविनःसाक्षात्कारंवदतिकविरितिहेतोर्हेवृंदावनेस्मिन्॥इरीरधाचाद्याद्यमितिसमस्मिन्प्रेसेयै वराजनमलाक्रन्मंदीस्येयमननमररगयुतंचेर्मुग्धकंछैःइ॥ ॥पुष्पदामेषुतोकैरिति॥७॥तदेति।यदिभूत स्यभाविनोर्थस्यसाक्षात्कारंवदतिकविरितिहेतोः।तदानर्हितैःसननमाभिकमित्यलंकरणंप्रोक्तं।तदुक्तं।भाविकभूतभा व्यार्थसाक्षात्कारस्यवर्णनमिति।हेराजसमस्मिन्वृंदावनेहरिःकृष्णोराधाचेतिद्वौविहरतःक्रीडतःतदहमयाप्रेप्सेप श्यामि।अत्रभूतार्थसाक्षात्कारस्यवर्णनंस्तस्मात्स्मरणंयत्तोद्रावनपरं।हेराजन्भमलमथेयमलाक्रन्मंदीस्यमन नप्रलयवीक्षेपस्यामि।अत्रभाव्यर्थसाक्षात्काववर्णनंकालस्यभीषणत्वोद्रावनपरं।यमननमररगणेगुरुश्चेःषड्भिःछैःसप्तभि र्यत्राचयुतंमुग्धकंस्यात्।तदुक्तंछन्दोमणौ।यनःरोभुविभिःकरमुरिरघनारमेर्मुग्धकंछैरिति॥६॥कथितइति।यदिहतु

मनासार्थकार्यणसहहेतुः कथितः यदिवानयोर्हेतुहेतुमतोरैक्यमुक्तलक्षणहेतुरलंकारः कथितः तदुक्तंहेतोर्हेतुमतासार्थ
वर्णनंहेतुरुच्यते।हेतुहेतुमतोरैक्यंहेतुंकेचिच्चक्षतइति।इयंश्रीःसंपत्तिःकान्तृनृनरानुर्गर्वणाढ्यान्संपन्नान्कुरु
तेकिल।अत्रगर्वोयंतिकार्यणसहश्रीरूपकारणस्यवर्णनं।भक्त्यानजनानराणांहरेश्चरणजाननस्मृपादृष्टेःपातएव
मोक्षः।अत्रमोक्षकार्यावश्यंभावनेनोत्प्रत्यायनार्थःकार्यकारणयोरभेदःसमयममगणरगुरुश्चेनर्हिपिंगलना
गेनेदंछंदःशंभुरित्यस्यायस्यनक्थितं।तदुक्तंयमणो।करहीरोकुंजरपोलोमीवरभर्गोःशंभुश्चेछंभुरिति॥९॥इत्यतिधृ
तिः॥अथविंशत्यक्षरपादजातोल्लासमसंगत्यायलंकाराभिरूपयन्रूपवदनांउत्सवयति।अन्यदिति।इहयदान्यत्कार्यक
कथितोहेतुर्यदिहेतुर्हेतुमतासार्थमेकोक्तेवैक्यंचनयोरुक्तंयदिनहरयंकिलनस्रीर्लोकान्गर्वाढ्यान्॥कुरुतेम
त्यामजतोहरेश्चरणपादस्पर्शोमोक्षःकथितस्तास्यमिदंश्रीपिंगलनागेनरत्नोन्मोगः॥९॥इतिअतिधृतिः
॥अथकृतिः॥अन्यत्कर्तुंप्रवृत्तोपिरचयतिविरुद्धंतस्यचयदातत्कृतासंगतिःसकविभिरिहरासकत्वमिहये॥
त्रिसंत्येतेसरायाःकिलपरिहरणंवृत्तैनिवदतिछंदोनागेमरभनयलागश्चेत्सरुवदनां॥९०॥॥
र्तुंप्रवृत्तोपितस्यकार्यस्यविरुद्धंरचयतिकरोतिनहितहासकविभिरसंगतिरुक्ता॥तदुक्तं।अन्यत्कर्तुंप्रवृत्तस्यतद्विरु
द्धछतिसयेति।इहलोकेयेनराःसराःसरासकत्वंलिप्संतेवांछंतिनेसरायाःपरिहरणंवर्जनंकुर्वंति।अत्रश्लेषेणमया
सनीछायेकुर्वंतिनेमयवर्जनंकुर्वंतीतिविरुद्धाचरणात्संगत्यलंकारः।सरासकंदेवासकत्वाभिप्रायपरिहारः।मरभनय
भगणालघुगुरूश्चेनर्हिभुजगःपिंगलानागरूछंदः।षेषुषेषुसप्तसप्तसप्तिर्भांसवदनोवदति।तदुक्तंरत्नाकरे।ज्ञेया
सप्ताश्वषट्भिर्मरभनययुतास्त्रीगणःसवदनेति॥९॥

यदिति।अन्यस्मिन्स्तोकेकार्यकरणीयंतनदूनरस्मिन्छतंयदिनहिसाऽसंगतिः।तदुक्तं।अन्यत्रकरणीयस्यततोन्यत्र
छतिश्चसेति।नृपेराजानंद्रुमाप्राप्तामाक्षीसंभ्रमात्कांचीरशनांगलेचलयंककणमपिपादेदधारःअत्रकांचनस्त्रीमध्य
भागेधरणीयांकांचीरत्नेधरणीयंचलयंचनृपदर्शनसंभ्रमेणान्यत्रगलेपादेचदधारःअन्यत्रधरणीयत्नंतुम
सिद्धत्वाभोपानं।तृतीयामाहायदेति।यदाहेतोःकारणस्यकार्यस्यचविरुद्धापिभिन्नस्थानाभिन्नदेशास्थितिर्निर्व
र्त्यमानाभवतितदान्यासंगतिः।तदुक्तं।विरुद्धंभिन्नदेशत्वंकार्यहेत्वोरसंगतिरिति।अत्रमेघेषुनंपिबतिसलिलंकोकी
निजीवतिअत्रश्लेषेणैकत्रामृतपानमन्यत्रजीवनमितिकार्यकारणयोर्विरुद्धभिन्नदेशास्थितिर्निर्वर्त्यसंगतिः

यदन्यस्मिन्कार्यंयदितनदूनरस्मिनछतंसाद्धारगलेकांचीपादेवलयमपिनृपंसंभ्रमादूद्रुमा
प्ता॥यदहेतोःकार्यस्यचभवतिविरुद्धापिभिन्नस्थानास्थितत्वंभेलोकोमृतमनिनिपंमोनोत
नोगोच्छिन्नंगा॥९१॥इतिकृतिः॥

अमृतेजलंयमननतनगणागुरुद्वयंचविषदूरछिसप्तसयतिश्चेनर्हिनागोभास्यात्।तदुक्तंयमणो।यनःशंभुर्वि
प्रःशशिोयनजलदाःषट्स्वरेरत्नंगेति॥९२॥इतिकृतिः॥अथैकविंशत्यक्षरपादजातोत्प्रत्यांश्लेषायलंकाराभिरूप
यन्स्वग्धरांतत्सयतिं।श्लेषइति।नानार्थानूनोधयत्यसौनानार्थयोगः।तद्भेदाविन्यस्तश्चेनर्हिश्लेषालंकारः।सचविषयिउपमा
नमप्रकृतमितियावत्विषययउपमेयंप्रकृतमितियावत्तयुगंप्रकृतमप्रकृतंचयुगुलंचनेषुगतत्वाद्विधमानत्वाच्चिधास्यात्
।एवंचाप्रकृतैकविषयः।प्रकृतानेकविषयः।प्रकृताप्रकृतानेकविषयश्चेतित्रिधा।तदुक्तंनानार्थसंश्रयःश्लेषोवर्ण्यावर्ण्यो
भयाश्रितइति।अयंराजाराजस्यजामदग्न्यस्यदारुणश्चयोवैशेयोयेपराक्रमीयस्यसोस्ति।अत्रजामदग्न्यदारुणश्चरुपमा

DR. BHAU DAJI MEMORIAL

नत्वेनामङ्गनयोरेकत्राङ्गेनकीर्तनादमङ्गलानेकविषयः श्लेषः। अत्रिहरिणाश्चिरतिपोदुराशिः अन्यत्रहरिणानूलक्षणयाह
रिणेनेत्यर्थः अत्रिः कोलाभिः सूकरीभिः सममनोभिः पुष्पैर्युक्तयुक्तकोलेर्वराहैः अन्यत्र पूर्वैः। कोलः पोतोवराहकिरिः किटिर्हरिति। उदुंबरपूर्वः
कोलदृत्तिचामरः। द्विजैः पक्षिभिः ब्राह्मणादिभिश्च आसंनृभिर्मनुष्यैः सेव्यंतत्पुलिनगिरिसंबंधिवनेऽरण्यंजलंचभाति।
जीवनंभुवनंवनमित्यमरः। अत्रपुलिनगिरेर्वर्ण्यत्वेननलक्ष्यौविपिनजलयोरपिप्रकृतत्वात्प्रङ्गलानेकविषयः। वाहिनीनां
नदीनांसेनानांचमूरुसंस्थानमाश्रयश्चगंधर्वैर्देवविशेषैरश्वैश्चनागैः संघैर्हस्तिभिश्चाढ्यः संपन्नोभूपतेश्चोराजाच
भाति। अत्रैकस्यवर्ण्यत्वेनापरस्यावर्ण्यत्वेनप्रकृताप्रङ्गलानेकविषयः श्लेषः। मरमनगणैर्यगणभयेणचछैः सभिः वाहैः

जयप्रङ्गलिः॥ श्लेषानानार्थयोधोविषयविषयनद्गमनश्चेन्निपात्यान्नराजायंरामश्चोधोतिहरिणरूमनोयकू
चकोलेर्द्विजैर्नेश्च॥ व्याप्तेसेव्यंनृभिस्तत्पुलिनगिरिवनंभातिगंधर्वनागाख्योभूद्वाहिनीभूर्मरभनययथैः स्वश्वरा
स्वाढ्यवाहैः॥१२॥ ॥सभनिर्यस्याचयुक्तमस्वश्वरास्यात्॥तदुक्तंरत्नाकरे। मत्तेर्यानांचयेणाश्विमुनियतियुक्ता
स्वश्वरोकीर्तनेवमिति॥१२॥ साकूतेति। इतरविषयेइतरस्यहृदयगमनोगतंज्ञातुः। तृतीयोगेषष्ठ्यानिषेधाद्धितीया।
साकूतासाभिप्रायाचेत्तर्हिनसूक्ष्ममलंकरणंस्यात्। तदुक्तं। सूक्ष्मंपराभिप्रायाभिज्ञेतरसाकूतचेष्टितमिति। हेसखेमो
दस्यासानयनकमलयुगलमर्पितंआलोकितं। अथकामुकदर्शनेसतिनस्यसंकेतकालप्राप्तिप्रायंज्ञानवत्याः
कस्याश्चिन्नेत्रकमलाच्छादनरूपाचेष्टाकमलसंकोचाधिकरणसायंकालेसंकेतकालइत्याकूतगर्भा। पिहितालंकार
माह। अन्येति। अन्यस्याचारंवृत्तांतंज्ञात्वासासाकूतचेष्टाचेत्तर्हिपिहितंस्यात्। तदुक्तं। पिहितंपरवृत्तांतज्ञातुःसा
कूतचेष्टितमिति। सामममचरणयुगस्यसेवयोग्यासंपन्नाजाता। अथरात्रौअतिदूरजारिण्यागृहंगत्वाप्रातःका

लेस्वगृहागतस्यपत्युश्चरणयुगुलसेवाप्राप्तोसीत्यभिप्रायगर्भा। इहमगणद्वयेनतगणेनजिभ्रष्टसप्तिपंचरूपस्यात्च
सहितामतकीरास्यात्। तदुक्तंरत्नमणौ। रसस्यष्टिमतकीजाहिरदगुरुदङ्गलधुकरतलेति॥१३॥ इतिप्रङ्गलिः॥ अथहावि
शत्यक्षरपादजातावाछत्यांव्याघातायलंकाभिरूपयन्महास्वश्वरोलक्ष्यति। कथितइति। इहहेतुत्वेनोरीकृतः स्वीकृ
तःअथचेहलोकेकथितःप्रसिद्धोयस्यर्थायोहेतुःससहेतुःतस्यविरुद्धेकृतोयहितर्हिव्याघातालंकारःस्यात्। तदुक्तं।
स्याद्व्याघातोन्यथाकारिक्रियेतचेद्धिति। यथहेतुनैवकेनचिद्गृहीतेननुतदन्येनतद्विहिना। तद्विरुद्धहेतुःक्रिय
तेचेदत्रयथायथहेतुत्वेनलोकेप्रसिद्धेनकेनचिद्विरुद्धहेतुक्रियतेचेत्तर्हिव्याघातः। क्रमेणोदाहरति। यथेति। सज्जनो

साकूताचेष्टाचेत्तज्ज्ञातुस्तिहृदयगमितरविषयेनसूक्ष्मंस्यान्नोरम्यासानयनकमलयुगलमर्पितंदधे॥ अस्या
चारंज्ञात्वासाचेत्पिहितमितरमचरणयुगलासेवांचकेकामतकीरेहभवतिजिचिममननननमेः॥१३॥ इतिप्र
ङ्गलिः॥ ॥कथितोव्याघातदुरीकृतहृदयविहेतुत्वोयस्यर्थायोपिचवितस्तद्विरुद्धेकृतहृदससहेतुयथाज्ञो
ननीति॥ मज्जनोलक्ष्यतेयेवासकलमपहृदमोदतेभांप्रभिर्यैर्विरहेणापीश्यतेनैःसननसमरागोमहास्वश्वरास्तेः १४
यथालक्ष्यासंपन्नाश्लोकसूचनेननीति अथमोदुर्मनस्तेयेवलक्ष्यासकलंनोकोपहवंतनीति। अत्रमज्जनेनलोकसू
चनेहेतुत्वेनकाश्चिन्नायलक्ष्योसेवसज्जनमतिहेतुनादुर्मनेननलोकदुःसूचनेहेतुत्वेनकाश्चिन्ना। यैरभस्यचंद्रस्याप्रभिःकि
रणैरिदंजगत्मोदतेतुष्यतिविरहेणकर्मोतेश्चंद्रविरहेणरात्रीश्यतेशोष्यते। अत्रसूचनेहेतुत्वेनलोकेप्रसिद्धायेचंद्रकि
रणास्तएवविरहेणदुःसूचनेहेतवःकृताः। सगणलगणद्वयेनसगणोरगणद्वयंगुरुश्चनैरङ्गिःछैःसप्तभिर्यतिश्चचेत
द्भिन्नास्वश्वरास्यात्। तदुक्तंरत्नमणौ। सूर्योधर्मश्चद्विगुरुरुगुरवोजेर्मतास्वश्वरांछेरिति॥१४॥ स्यादिति। इहालो

यत्कार्यैअसदपिहेतुत्वेनाविद्यमानमपि।अपिशब्दाद्विद्यमानंचदृश्यतेहेतुत्वेनयेनपुंसाविरचितमुत्कंस्थानतद्दन्येनतदेव
वस्तुतद्विरुद्धेकार्यैसौकर्यैणतत्करतयाहेतुःपरिविरचितःकल्पितोऽसियदितत्कृतसख्यापातःस्यात्।तदुक्तं।सौकर्यैणनि
बद्धापिक्रियार्थविरोधनीति।हेकमलेलक्ष्मिभजकमपिभक्तमपिममांगीनंमत्वानालोकयसि।यदिनहित्वयास्मादेवहे
तोरहमालोक्योदृष्टिमर्हः।अत्रकेनचिन्मलनस्यामकंत्वंदीनइतित्वांदेवीनालोकयतीति।ततःसआहमत्वादीनमि
त्यादि।तथाचदेवीकर्तृकानालोकनेहेतुत्वेनकल्पितं।यदिनत्वंतदेवतदन्येनतदालोकनेसौकर्यैणहेतुनयाकल्पितमि
तिलक्षणानुगतिः।मगणद्वयंनगणोनगणत्रयंसगणोगुरुश्चेतैरिमैरष्टभिर्यत्याचयुतानंसीभवति।तदुक्तंछन्दोमणौ।

स्याद्यत्कार्यैयद्धेतुत्वेनविरचितमसदपिदृश्यतेविद्यमानंवाकार्यैसौकर्यैणाख्यंपरिविरचितंहेतुः॥
सस्यान्मत्वादीनंनालोकयसियदिनजकमपिकमलेमालोक्योत्वादेवाहंसीभवतिममननननसगयुतैर्भैः
॥१५॥प्रश्नाभिन्नमहीनरमाहितमेवंप्रभृत्यादिषुचक्रुतंयत्कोनरमतिनुचित्रमिदंकोदंडधरोनिरिक्षनु
तः॥कःशेषेशयनंकुरुतेचतमःकोनाशयतिप्रबलनरःकोरण्येसिंहःकथितात्रहिनालीलामससाःसनजन
गाः॥१६॥इत्याद्युक्तिः॥ ॥अष्टौद्वारावत्रप्रादंडालक्ष्मीहिनामिभविरतिरितिहंसीति॥१५॥प्रश्नेति।प्रश्नाभिन्नंप्र
श्नारभृथक्कमहदुनरमाहितंस्थापितंयद्विषंप्रश्नयुगादिषुप्रश्नद्वयादिषुएकमुनरंक्रमलक्ष्मियदितत्कृतंचित्रमलंकरणंस्या
त्।तदुक्तं।प्रश्नोनरोनराभिन्नमुनरंचित्रमुच्यतइति।क्रमेणोदाहरति।कोदंडधरइति।निरिक्षेतेर्नुतःस्कृतःदंडधरःकइति
प्रश्नःतदभिन्नंकोदंडधरोनामधनुर्धरइत्युनरं।कःशेषेशयनंकुरुतेकस्तमोधकारंनाशयतिकःप्रबलनरोरण्येसिंहइति
प्रश्नाणांप्रश्नानांहरिरिक्षेकमुनरं।हरिर्नामविष्णुरर्कःसिंहश्चनथाचामरः।यमानिलेंद्रचंद्रार्कविष्णुसिंहांशुवाजिषुइति

मगणःसगणत्रयंनजगणागुरुश्चेतर्यद्विनाविंगलनागेनलीलाकथिनाद्रयंकविद्वल्लाकरपुल्लकेरस्यते॥१६॥इत्याद्युक्तिः
॥अथत्रयोविंशत्यक्षरपादजातीविद्युल्लेखाविषमालंकारंनिरूपयन्॥चित्रंकेलक्षयतिवस्त्वनइति।अननुरूपयोर्वस्त्वनोर्य
दनंमेलनमाहुश्चेत्कथिरितिशेषः।नहिविषममलंकरणमुच्यते।तदुक्तं।विषमंवर्ण्यनेयत्रघटनाननुरूपयोरिति।हेभवन्
भवगुणांभोनिधिःकनत्रगुणांभोनिधिःकनत्रगुणांभिनिधीसंजिगमिषुःसम्यक्कुर्गंतुमिकुर्मंडधीरहंक।अभागाधानेनत्वे
नात्यल्पेनचाननुरूपयोर्गुणसमुदनत्वविरुद्धयोर्घटनेकारणेनविरूपंकंकारणासरूपंकार्यमाहुर्यदितहिनतूविषमुदीरि
तंप्रोक्तं।तदुक्तं।विरूपकार्यस्योत्पत्तिरपरंविषममंससमिति।धवलजाहवीह्लवपुषःप्रजाःप्रसूतेउत्पादयति।अत्रभागीरथ्यो

अथविद्युल्लतिः॥वस्त्वनोर्घटनमाहुश्चेदननुरूपयोर्विषममुच्यतेगुणांभोनिधिःकनंवनत्रसंजिगमिषुस्त्वलंक
मडधीर्विरूपकं॥कारणेनयदिकार्यमाहुतदुदीरितंधवलजाह्नवीप्रसूतेसिह्लवपुषःप्रजानरनारनीरलवस्त्वित्रकं॥
त्यकेदत्रात्मभावेणविष्णुरूपाभवंतीतिकारणगुणप्रक्रमविरुद्धाश्चेतवर्णभागीरथ्याःसकाशाच्छामवर्णप्रजोत्पत्तिः।ननरनर
नरगणात्रयुगुरूचचेत्रिचकंस्यात्।तदुक्तंक्रमणे।त्रिमूर्गंद्रगुणांद्रवेतदनुजोद्दलभनगणोनुचित्रकमिति॥१७॥इष्टेति।
इष्टइष्टात्मानिष्टेइष्टप्राप्तावनिष्टप्राप्तौस्यातांयदिइष्टानामिष्टप्राप्तिरेवाअनिष्टमेवानामवतियदितर्हिकथिनःइत्यनेन
मकारेणात्रविषमिदंविषममुदितंकथितं।तदुक्तंकुवलयानंदे।अनिष्टस्याप्यवाप्तिश्चेत्तदिष्टार्थसमुच्चयमाहित्युत्तरअ
निष्टावाप्तेरपिग्रहसंगृहीतायाइष्टानवाप्तेश्चमत्यैकमपिविषमपदेनाचष्टेनतश्चकेवलानिष्टप्रतिलंभःकेवलेष्टानवाप्ति
श्चेत्यत्रदपिविषमइत्यनेनसिद्धंभवतीति।धनधिषाधनेच्छयेत्यर्थः।नगरमरतिसतिअसौयाचकत्वेनइष्टामृतः।अत्रयाच
केधनेच्छयानगरमरतिसतिनकेवलंधनानाप्तिःकिंतुस्वरूपतानिरपीतिदृष्टानष्टिरनिष्टप्राप्तिः।अस्त्येषोःपुरुषस्यतद्

दनमपिअपिशब्दात्पेयंचनमिलितं।अत्रकेवलंभस्यादनरूपेष्टानवाप्तिर्भोक्तेस्तुलब्धस्यसत्वेऽसंभविमिलितं।अत्रभस्य
दनरूपेष्टावाप्तिसद्भावातेनसहविषादनरूपानिष्टप्राप्तिसद्भावाच्चकेवलानिष्टप्राप्तिः।मगणद्वयेनगणेनगणचतुष्टयेनष
गुरूवर्णेनेनअष्टसप्तदशपंचसप्तयतिर्यस्यतन्मनाक्षीरंस्यात्।अत्रमनाक्षीरमितिनपुंसकलिंगमष्टसप्तयंचसप्तयतिश्चसप्तदश
मतन्मिप्रायेण।मृद्वंतुमनाक्षीरमोलोनोन्लोगवसप्तपंचदशाकावितिः।।८।।इतिविच्छित्तिः।।अथचतुर्विंशत्यक्षरपादजातसंख्य
स्योपर्यायययथासंख्यालंकारोनिरूपयन्विभ्रमगतिंलक्षयति।चेदिति।एकंबस्त्वेनैकस्मिन्पर्यायेणः पर्यायेणाश्रितंचेत्त्र
यवा।नेकेपिपर्यायेणएकस्मिन्गताश्चेत्तदानर्हिपर्यायालंकारःकथितः।तदुक्तं।पर्यायोयदिपर्यायेणैकस्यानेकसंश्रय
इष्टलाभानिष्टेस्यात्तोयदिकविभिरिदमुदितंमिहभवतिलेवेशनाप्तिर्वानिष्टंश्रियमिनिगरमदतिधनधिया।।सैवासो
नष्टोमस्थेछोर्मिलितमिहनतदहनमपिमिलितंनलसत्वेऽजडयतिममननननलगुरुभिः।।९।।अथसंसृष्टिः।।चेत्
र्यायएकमाश्रितमनेकस्मिन्नेकेपिवैकगतास्तदापर्यायःकथितोवतिस्त्रियगतौमीनोविहायाधुनारिपुरामन।
दारिद्र्यंगतमागतंवसुयथासंख्यंतुवेदत्वयःक्रमिणांक्रमात्।राभूनोद्यजयावविभ्रमगतिःप्रोक्तास्तनस्तंसरीरहभोगिना।९
इति।एकस्मिन्ययनेकंवापर्यायः सोपिसंसृष्टइति।क्रमेणोदाहरति।हेरामत्वयिअवतिरक्षतिसतिपृ।थ्वीमितिशेषः।
भीर्मितिनोःस्मनविहायत्वत्काधुनारिपुगता।अथैकस्यामीत्यादिपर्यायेणरामभक्तत्वंचुरुत्यनेकाधारश्रयणं।हेरा
मनोस्माकंदारिद्र्यंगतंवसुधनमागतं।अत्रदारिद्र्यवसुरूपानेकाधेयस्ययथापर्यायेणरामभक्तरूपैकाधाराश्रयणं।क्रमिणां
क्रमवतांक्रमादन्वयश्चेत्तर्हियथासंख्यमलंकरणंस्यात्।तदुक्तं।यथासंख्यंक्रमेणैवक्रमिकाणांसमन्वयइति।हेराज
न्।अद्यराभूनोस्माश्चजयावरक्षःअत्रराभूनजयास्मान्अवेतिक्रमेणान्वयः।इहभोगिनापिंगलनागेनम

सजसगणाः।नगणद्वयेभरगणेनचतुर्थेभ्रमगतिःप्रोक्तानदुक्तंयमर्णा।कर्णेंद्रोजगणोथविभ्रमगतिर्ब्रह्मंचशीरद
यंदहनामृनेइति।।९।।इतिसंसृष्टिः।।अथपंचविंशत्यक्षरपादजातावतिशय्योपरिवृत्तिपरिसंख्यालंकारोनिरूपयन्
कोंचपदोलक्षय।स्यादिति।अधिकन्यूनयोर्विनिमयः।यूनंदत्त्वाधिकग्रहणमधिकंदत्त्वान्यूनग्रहणंचेत्तर्हिपरिवृत्ति।
रलंकृतिः स्यात्।तदुक्तं।परिवृत्तिर्विनिमयोन्यूनाधिकयोर्मिथइति।इहलोकेसाम्प्रमिद्धाबदरीबदराणांबदरीकल्प
नोचितरणाहानाहामस्यकृपांप्राप्ता।अत्रबदर्योरल्पबदरीफलदानेनमहायोगिदुष्प्रापरामकृपाग्रहणं।रूपकविः अ
र्थेकंचनपदार्थेकापिनिधिप्यनरपरेतस्मादपरस्मिन्स्तुलेमिवदतिकथयतिचेतदापरिसंख्यालंकृतिः स्यात्।त
दपानिकृतिः स्यात्परिवृत्तिश्चेदधिकन्यूनविनिमयइहनुदरविदरणात्।रामकृपांप्राप्ताबदरीसायदिचरूपकवि
रमिवदतितदपरे।कापिनिधिप्यार्थेपरिसंख्ययमवतिनृपइहनृपुनिवमनं।केशिकएवकोंचपदाभ्रमननननगु
रुपुगिरुजयतिः।।२०।। ।।दपरइत्यवपूर्वादिभ्योनवभ्योवेतिविकल्पात्तस्मिन्नादेशाभावः।तदुक्तं।परिसंख्यानि
षेधैकमेकस्मिन्यत्रलक्ष्यतेवणमिति।इहनृपेगमराजअवतिरक्षतिमतिपृथ्वीमितिशेषः।केशिकेकेशानांसमूहेणअ
चितलक्ष्मीतिसमृद्धेदकुनियमनंबंधनंनृषुनुनामीत।अत्रबंधनरूपपदार्थस्यनरेषुनिषेधः केशसमुदायेकथनं।इहभ
मसगणाःनगणचतुष्टयेगुरुश्चेतेर्युक्ताइ-इ-चेषुपंचसुपंचसुअष्टासुचयतिर्यस्याः साकोंचपदास्यात्।तदुक्तंना
कोरे।कोंचपदाभोस्थोननननागाइषुशरवसुमुनिविरतिरिहभवेदिति।।२०।।इत्यतिकृतिः।।अथषड्विंशत्यक्षरपाद
जातावुत्कृष्टसमालंकारंनिरूपयन्नुनंगविनुंभितंलक्षयति।चेद्धेतोरिति।हेतोःकारणस्यसादृश्यंकार्येभिन्नेचेत्तर्हि
सममलंकरणंस्यात्।तदुक्तं।सादृश्यमपिकार्यस्यकारणेनसमंविदुरिति।हेराकरात्मजगजाननइहलोकेऽदनेशंक

रत्नमुचितंयोग्यं।अत्रशंकल्याणंकरोतीतिशंकरइत्यन्वर्थनाम्नःशिवस्यपुंवेगजाननेपिकल्याणकर्तृत्वमितिकार्यस्यकारणे
नसारूप्यं।योर्थःकर्तुमिष्टःसोर्थअनिष्टलंभनमंतरानअनिष्टप्राप्तिंविनाभवतिसिध्यतिचेत्तर्हीयंसमस्यात्।तदुक्तं।विनानि
ष्टंचनसिद्धिर्यदर्थंकर्तुमुद्यतइति।हेनरपराजन्इदंस्वर्णार्थ्यंहेलांश्लिष्टाआश्रित्यवर्णंप्राप्तोसि।अत्रयत्नवर्णेष्ठया
राजाश्रयःकृतस्तत्संवर्णप्राप्तमित्युक्तानार्थेनयेदर्थमुद्योगस्तस्यनिष्टप्राप्तिंविनासिद्धिरितिलक्षणसमन्वयः।श्लेष
णतुद्वितीयस्वर्णपदस्यसंबंधःकृष्णंप्राप्तमितिव्याजस्तुतिः।अनुरूपयोर्वस्तुनोर्योटनेपिसंगतावपितत्समंस्यात्।तदुक्तं
।समंस्याद्वर्णनंयत्रद्वयोरप्यनुरूपयोरिति।काश्यांवाराणस्यांगंगायाभागीरथ्यायोगोयोग्योसि।अत्रातिपाद
अथोद्भूतिः॥चेद्वेनोःसारूप्यंकार्यंस्लिसमभिदमुचितमिहशंकरःसज्जशंकरत्वेतेयोर्थस्त्विष्टःकर्तुंसभवतिस
मयरमनिष्टलंभनमंतरा॥श्लिष्टांवांस्वर्ण्यार्थ्यांप्तःस्वणमल्लिहनरपयदनेषितत्यनुरूपयोःकाश्यांगंगायोगो
योग्योजटयतिमननिरसलाभुजंगविभृंजितं॥२९॥ ॥नलेनातिमनोहरत्वेनचानुरूपयोःकाशीभागीरथ्योर्योगः
।मगणद्वयंतगणोनगणत्रयंरसगणोलघुर्गुरूचचेन्हिजयोरष्टरुरुकादशरुचयतिर्यस्यतद्भुजंगविभृंजितंस्यात्
।तदुक्तंरत्नाकरे।वक्षीत्राश्चेछिदोषेतंममननयुगरसनलगैर्भुजंगविभृंजितमिति॥२९॥इत्यद्भुतिः॥अथदंडकेधि
कायलंकारानिरूपयन्दंडवृष्टिप्रयातंलक्षयति।अधिकमिति।यद्हिआधेयेमहाधारतःपृथुलाधारात्अधिकतो
कानदीधिकमंडलंकरणस्यात्।तदुक्तं।अधिकंपृथुलाधारादाधेयाक्यवर्णनमिति।हेलक्ष्मिभुवनधरेपितेरीशनो
दरेममागःअपराधोनमास्ति।अत्रयस्यलक्ष्म्यरस्यभुवनाधारत्वेमविशालत्वेप्रदर्शनंनमनमातीत्याधेयस्यापराध
स्याधिक्यंवर्णितं।अपरंलक्षयति।एवमिति।एवंमहतआधेयतआधेयादधिकआधारउक्तश्चेन्हिअपरंत

त्।अधिकमुदितंप्रोक्तंतदुक्तंपृथ्वाधेयाद्यदाधाराधिक्येतदपिनमनमिति।देवकीकुक्षिर्महान्।ययस्मादयंकृष्णोवि
कुक्षेर्योयस्यसएषश्रीहरिःस्थितः।अत्रविश्वकुक्षित्वकथनेनाधेयस्यहरेर्विशालत्वेप्रदर्शनंतस्यसदेहस्यदेवकीकुक्षि
स्थितिकथनेनाधारस्याधिक्यवर्णनं।नयुगुलेननगणद्वयेनमुनिरैःसप्तभीरगणैश्चदंडवृष्टिप्रयातोदंडकोभवेत्
।अनुपादंप्रतिदंडकचरणेपुरगणवृत्त्याधरेअर्णादयोदंडाकाःस्युः।तदुक्तंरत्नाकरे।यदिहनयुगुलंतनःसप्तरेफास्त
राचेदंडवृष्टिप्रयातोभवेदंडकइति।प्रतिचरणमिहवृद्धरेफस्मरवर्णार्णवश्चालजीमूतलीलाकरोदामशंखादयइति॥२२॥
इत्यद्भुतीति।इहयदासूक्ष्मादाधेयतआधेयात्सूक्ष्मामाधारंवदतिकविरितिशेषः।तदाल्पमितिसंज्ञायस्यतदलंकर
अथदंडकाः॥अधिकमकृतामताधारतोयद्हिचाधेयतःकृतदालक्ष्मिनेसुदरे।त्वयिभुवनधरेममागोनमास्येवमा
धारतःकोधिकश्चेन्मताधेयतः॥तदपरमुदितंमताद्देवकीकुक्षिरोषोनयद्हिस्वकुक्षिस्थितःश्रीहरिः॥नयुगुलमुनि
रैर्भवेद्दंडकश्चंडवृष्टिप्रयातोमुपादेरुभापरे॥२३॥इत्यद्भुतितिदात्यसंज्ञंचसूक्ष्मायदाधेयतःसूक्ष्मामाधारमीशाणु
विनेनुते।ममननुरयिमेनरीनस्तनुर्मातिनोक्तिर्विदेरारभनूवस्तुशक्यंपरंयाचरेत्॥यदिभवतिविशेषभाख्यानवाचा
पिरंभामयानुर्यपादेरिहेत्वर्णषोडशेंद्रिगनवनवगैर्मितार्णोनमर्णानमर्णार्णवश्चालजीमूतलीलाकरोदामशंखादयः
णेत्यान्।तदुक्तं।अन्येनुसूक्ष्ममाधेयाद्यदाधारस्यसूक्ष्मतेति।तेईमंजरीतोमंजर्यास्तनुःसूक्ष्मामननुरयिनोमतिः।इ
दंकस्याःस्थिरलिप्याःपंक्तिप्रतिवचनं।अन्याधेयस्यतन्वाःमंजरीतस्यनुरित्यनेनातिसूक्ष्मतामुक्तानोप्याधारस्यचि
तस्यागुणत्वकथनेनातिसूक्ष्मतादर्शिता।विशेषालंकारंलक्षयति।किंचिदिति।किंचिद्दूरारभनेवपरमन्यमनाक्यंवस्तु
आचेरुर्कुर्याद्यदिनहिंविशेषोलंकारोभवति।हेकृतनुमयातवाख्यालंभनरंभवाधिलक्ष्म्या।इदंकस्यचिद्वेयमीप्रतिष

चनं। अत्रेयसीदर्शनरंभेणरंभादर्शनरूपात्कथनस्तेनगम्यतिः॥तुर्यपादेपूर्वश्लोकचतुर्थचरणेउदितेषुअनुपादेरवृध्या
परेइत्यनेनेतेषुदंडकेषष्ठरगणोर्णनामास्यात्॥एवमंघ्रिगताःपदगताःनवनवगोमिताःनवनवत्यधिकनवशतमिताअ
र्णविर्णोयस्यदंडकस्यदंडनमेनमारभ्यार्णार्णवव्यालजीमूतलीलाकरोद्दामशोस्यादयोदंडकाःस्युः॥२॥अथमपीति।स्यात्
प्रसिद्धमाधारंविनाधेयमुक्तंचेतदाहिअथमलंकारोपिसविशेषोभवेत्॥तदुक्तं।विशेषःस्यानमाधारंविनाप्याधेयवर्ण
नमिति।एषाचंचलाविद्युन्मुदिरेणमेघेनरहितेस्थलेलिखितअत्रचंचलायामपिपद्मःकमलमस्तिअत्रपद्मेमीनोस्तःइयं
रूपुकांतिर्यायातिः॥अत्रविद्युद्रूपपद्ममीनानांमेघजलरूपप्रसिद्धाधारेणविनाधारांतरेस्थितिरुक्ताअपरमाहाअनेकयेति।

अथमपिचसभवेद्येहिनाख्यातमाधारमाधेयमुक्तंतदाचंचलेषास्यिमुदिरेनेत्रापिपद्मोत्र
मीनावनेकत्रयेकत्रस्थूदितंस्यात्कविभिरुक्तिमत्वात्रामःप्रतापीरणेरावणेनेक्षिसर्वत्रभी
त्या॥अस्मिन्कइतिभवेदंडकोनोत्यग्रायवृध्यास्करर्णादयःपूर्ववत्॥२४॥ ॥

अत्रशास्त्रेएकंवस्त्वेकमानेकेषुस्थलेषूदितंस्यादितिहिकविभिःसविशेषएवाकथिकथितः॥रावणेनमीत्यारणेप्रता
पीरामःसर्वत्रसर्वदिक्षुलेक्षिदृष्टः॥अत्रैकरामस्यसर्वदिक्ष्ववस्थितिः॥नोनगणइत्यंत्याःसप्तप्रायगणाश्चेनहिप्रसि
द्धनामादंडकोभवेत्॥तदुक्तंतेनैव।प्रसिद्धकसमभिधोधीरधीभिःस्मृतोदंडकोनदृष्टादुनरैःसमग्रैरितिः॥यानो
यगणानांवृध्यापूर्ववदर्णादयःस्युः॥यथारगणवृध्यार्णार्णवादिनामानःस्युःतथायगणवृध्याएनविःस्युः॥तदुक्तं
रत्नमंजे॥तद्वर्धेयवृध्यास्करर्णादयःपूर्ववन्मताइति॥२५॥अथरसवदादयलंकाराभिरूपयिष्यन्तत्साधनीभूतान्रसा
दीन्निरूपयति।इहेति।इहसाहित्यशास्त्रेविभावैर्व्यभिचारिभिरनुभावैर्वैवण्यादिभिःसंचारिभावैःसंमोहादिभिश्चा

भिव्यंजिताःध्यादिन्यायेनरूपांतरेणपरिणामंप्रापिताः॥ननुयदप्रदीपन्यायेनप्रकाशिताःयेस्थायिभावामीत्यादयस्त
वरसाःस्युः॥तदुक्तंसाहित्यदर्पणे।विभावेनानुभावेनव्यक्तःसंचारिणातथारसतामेतिरत्यादिःस्थायीभावःसचेतसामिति
नेचरसानवस्युः॥तानूदर्शयति।अथानवरसानीति।शृंगारहास्यकरुणरौद्रवीरभयानकबीभत्साद्भुतानामयंक्रमः॥अथोद्देशः॥आस्याद्येअभिधानंचेत्यमरः॥
तेषांस्थायिभावानाह॥नवस्थायीति।प्रीत्यादयःक्रमान्नवस्थायिभावाःस्युः॥रुद्रःक्रोधः॥प्रीतीरतित्यत्रइत्संज्ञेपेपूर्वस्मेतिदी
र्घः॥स्थायिभावोनामभावोनैरंतरीयतयारसत्वंनयन्नेषुअनुगतः॥तदुक्तंसाहित्यदर्पणे।स्थायीभावोरसत्वंयत्रकुत्रापिवाकाव्यनाट्ययोः॥
रुद्रः॥ननिरोधीयतेस्थायीतेरसोपपद्यतेपरमिति॥नचरौद्रसत्वदर्शनादिहअनिनामनोवैकृत्य

इहरसास्यस्युस्तेस्थायिभावाविभावैरभिव्यंजिताश्चानुभावैश्चसंचारिभावैश्चयेतेनवस्यर्थया॥नकइतिस्या
च्छृंगारसंज्ञश्चथीमत्तनामाचरौद्राख्यश्चानुनास्यश्चास्याभिधानतया॥करुणनोनोनवस्थायिभावास्क
मीतीरतिःस्याज्जुगुप्साचरुविस्मयोत्साहहासाश्चनोक्रमःस्यःक्रमात्॥नगणगाश्चायदाख्याद्याएकोत्रि
शिष्यमनंप्रेक्षेयभगाद्यामताक्षोद्यमाःक्रमोसंज्ञकोरुद्रैः॥२६॥ ॥

DR. BHAU DAJI

---

रणभीतिः। मनोनुकूलेर्थेमनसः प्रवणतारतिः दोषदर्शनादिभिर्विषयेषुगर्हाजुगुप्सा। प्रतिकूलेऽनिष्टेऽप्यज्ञानंक्रोधः। लोकसीमनिवर्तिषुपरार्थेषुचेतसोविप्लवःस्मारोविस्मयः। कार्यारंभेषुत्त्वरितरः संरंभउत्साहः। रागादिविरुतश्वेतोविकाशोहासः। इष्टनाशादिभिश्चेतोवैकृत्यंशोकः। निरीहावस्थायास्वात्मविभ्रमजंरुदंरागः। नगणगुरुभ्यांपरेष्टैरारगणाआद्ययेषांतेगणाद्यरातहाविषश्चिरुणानांमाताः पन्नगाद्यारंडकाः स्युः। तेषुपन्नगादिसंज्ञकेषुरुदैरेकारराभीरगणे। र्मालतीसंज्ञकोभवति। तदुक्तंरुद्रमणेोनगणगाभ्यांपरैरष्टैः पन्नगाः स्युस्ततोत्रैकरेफाभिरुभ्यादंभोलिहेलावलीमालतीकेलिकंकेलिलीलाविलासाह्वयइति॥२९॥ ॥विभावादीन्निरूपयति। प्रवरन्तीति। भरतसंज्ञकऋषिर्विभावान्आलंबनाख्यान्ततोद्दीपनाख्यानितिद्विधाद्विप्रकारकान्प्रवरति। इहअनेभयरादयःपञ्चार्थाःक्रमेणरसक्रमेणअमीषुद्विविधविभावेषुआदिभूताआलंबनाख्याः स्युः। तत्रभयदाख्याह्रयः। वधूःस्त्रीरुरुपलक्षणंअतोनामकस्यापिग्रहणं। पूतिगंधिदुर्गंधिमांसरुधिरादि॥ द्विरुक्तानुअश्वर्यरुत्अतिलोकसीमरसु। वैरुत्नेरी। अयमालंबनविभावोयुक्तयीरस्यादानवीरेदानशौण्डादयोज्ञेयाः। वैरुताकारोविरुनाकारः। स्वार्थेण्। इदमप्युपलक्षणंविरुतनागादेः। शोच्यंशोकार्हंमृतेष्टादि। अतिविलासारतानित्यतादिनाशोवरुत्नि। निःसारता। आद्यपदेन परमार्थसरूपसंग्रहः। तदुक्तंसाहित्यदर्पणे। रत्याद्यद्बोधकाःलोकेविभावाः काव्यनाट्ययोः॥आलंबनोद्दीपनाख्यौतस्यभेदावुभौमतौ॥आलंबनोनायकादिस्तमालंबंचरसादयइति। इहेबुधाइहक्रमतोघोरंचेदुरितात्क्रमः परेउद्दीपनविभावाःस्युः। तत्रघोरंचेष्टाघोराचासौचेष्टत्यर्थः। अघोरालंबनाआद्यारेः। इंदुश्चंद्रः। रुग्व्याधिः। रुगिवातः अर्थोरालंबनदुर्गंधिरस्तनि। विहिद्विचेष्टाशवचेष्टामुखिमहारादिः। आश्चर्यरुत्सगुणाः अतिलोकसीमगुणाः शवचेष्टाःस्वापकारादयः इमउद्दीपनविभावामुक्तवीरस्यादानवीरादेः पात्रमात्तिसाम्राज्योरेयोज्ञेया। विरुताकारस्यचेष्टागतिभाषणादिः। शोच्यार्थान्मृतेष्टादेः।

प्रवरतिभरतर्षिर्भावान्द्विधालंबनाख्यारुत्योद्दीपनाख्यानमीषादिभूताः क्रमेणाप्यमीस्युः इहभयदरुधूपूतिगंधिदुरुत्साश्चर्यैर्यरुद्वैरुद्वैरुताकारशोच्यातिलासनित्यताद्याः परेस्युः॥ क्रमतइबुधाघोरंचेष्टंदुरुक्यात्तिविहिद्विचेष्टाशवाश्चर्यरुत्सगुणा

शत्रुचेष्टानर्थचेष्टाकारचेष्टाचतुष्टयं सप्तलोकदृत्यादयोत्रेपुलास्वेष्टयाः सिंहविक्रांतसंज्ञाः॥२५॥

सतां पुण्याश्रमक्षेत्रतीर्थवनादीनामालोकोदर्शनं इत्यादयइत्यादिशब्देन शृंगारादिषुवसंतादिकालपुष्पितवनादिदेशादेर्ग्रहणं। तदुक्तंसाहित्यदर्पणे। उद्दीपनविभावास्तेरसमुद्दीपयंतियेः आलंबनस्यचेष्टाद्याः शत्रुकालादयस्तथेति। अत्रेपुलाः पंचलघवःसेष्टया यथेष्टयगणाश्चेत्सिंहविक्रांतसंज्ञोदंडकः। तदुक्तंछंदोमणौ। रारमितलघुवर्णोसतौयेयथेष्टैरसौसंस्मृतोदंडकः सिंहविक्रांतनामेति॥२५॥

क्रमेणेति। वैवर्ण्यादयः क्रमेणानुभावास्युः। इत्यादयइत्यस्यप्रत्येकंसंबंधादन्येपिग्राह्याः। तथाचवैवर्ण्यगद्गदभाषणकंपसेदरोमांचाश्रुवैस्वर्यभयानकस्य। कटाक्षभ्रूविक्षेपादयः शृंगारस्य। निष्ठीवनमुखवलननेत्रसंकोचादयोबीभत्सस्य। भ्रूभंगोष्ठदंशबाहुस्फोटनतर्जनादयोरौद्रस्य॥ घर्मरोमांचसंभ्रमादयोद्भुतस्य। सहायान्वेषणमार्गणभिक्षादयोयुद्धवीरस्य। दानवीरेसुसत्याध्यवसायादयोज्ञेयाः। नेत्रसंकोचमुखस्मेरतादयोहास्यस्य। देवनिंदाभूपातक्रंदनादयः करुणस्य। रोमांचानंदाश्रुक्रमेणानुभावास्तुवैवर्ण्यमेवंकटाक्षश्चनिष्ठीवनंमुहिर्घातोघर्मः सहायान्वेषणंनेत्रसंकोचनंदेवनिंदाश्चरोमांचहर्षादयः स्युः॥ क्रमेणेवसंचारिभावास्तुसंमोहनालस्यमोहोग्रदंशभ्रमाधृतिस्वप्नास्वैराग्यमुख्यारसेषुत्रयस्त्रिंशद्देतेतु साधारणाः प्रायशाः स्युः॥ द्विधास्यत्रशृंगारउक्तोस्तियोगपूर्वस्तविप्रलंभात्परोवीरसंज्ञस्त्रिधायुद्धवीरस्तथादानवीरोदयावीरइत्यनेनशांतस्तुसैर्वैरुदीरितः॥ नवभ्योधिकोरसस्तत्रलंसरोपीतरैर्भोक्तिः स्थायिभावादयस्नेहेत्रोचनज्वेष्टनालिंगनानिष्ठ्यूंकायथेष्टमेकारैस्मृतः सिंहविक्रीडनामा॥२७॥

तादयः शांतस्यायआलंबनोद्दीपनभावस्वरूपकारणेरुद्भोभीत्यादिस्थायीभावः कार्यरूपेणबहिःप्रकाशंतामेतिसोनुभावः। तदुक्तंदर्पणे। तदुक्तैःकारणैःस्वैःस्वैर्बहिर्भावंप्रकाशयन्। लोकेयः कार्यरूपः सोनुभावः काव्यनाट्ययोरिति। संमोहनाधृतिमुख्याश्चसंचारिभावाः क्रमेणेवस्युः। एतेतुत्रयस्त्रिंशत्संतिप्रायशोरसेषुसर्वरसेषुसाधारणाश्च। स्मितयावर्वमानेस्थायिनिमाद्भर्भरतिरोभावा

भ्यामभिमुख्येनचरणाद्व्यभिचारिणः। तदुक्तंदर्पणे। विशेषादभिमुख्येनचरंतोव्यभिचारिणः। स्थायिन्युन्मग्ननिर्मग्नास्त्रयस्त्रिंशत्तेमताइति। तेचाभिर्वेदावेगैर्न्यश्रममदजडताऔग्र्यमोहविबोधःस्वप्नापस्मारगर्वमरणमलसतामर्षनिद्रावहित्थाःऔत्सुक्योन्मादशंकास्मृतिमतिसहिताव्याधिसत्रासलज्जाहर्षास्त्याविषादाःसुप्तिश्चपलतागलानिचिंतावितर्काः। संमोहनादिष्वाधमुख्यरतिरेषसेकमभिसंबध्यते॥ तथाचसंमोहत्रासग्लान्यादयोभयानके। आलस्यौग्र्यजुगुप्सामरणादयश्चशृंगारे। मोहापस्मारावेगव्याध्यादयोबीभत्से। उग्रतावेगरोमांचवेपथुस्वेदादयोरौद्रे। संभ्रमवितर्कहर्षाआद्भुते। धृतिमतिगर्वस्मृतिरोमांचादयोयुद्धवीरे। हर्षस्मृत्यौत्सुक्यादयोदानवीरादौज्ञेयाः। स्वाप्नस्यावहित्थादयोहास्ये। निर्वेदमोहापस्मारग्लान्यादयः करुणे। वैराग्यहर्षस्मरणमत्यादयः शांते। अन्यस्यस्थायिभावोन्यत्रसंचारिसंज्ञांगलभते। देवगुरुनृपादिषुनिर्विषयारतिः। उद्बुद्धमात्रोविभावादिभिरपरिपुष्टत्वारसतामनापद्यमानः स्थायीभावश्चभावशब्देनोच्यते। अत्रशृंगारोद्विधा॥ उक्तोस्तिद्वैविध्यमेवदर्शयति। संभोगेति। संभोगशब्दःपूर्वोयस्यतथाविप्रलंभाच्चापरश्चशृंगारः। संभोगशृंगारोविप्रलंभशृंगारश्चेत्यर्थः। यत्रविलासिनावन्योन्यस्यदर्शनंस्पर्शनंचवनादीनिचरुरुतत्रसंभोगशृंगारः। यत्रप्रकृष्टारतिरभीष्टोपैतिनविप्रलंभशृंगारः। वीररसंविभजतेवीरसंज्ञइति। धर्मवीरोपिचतुर्थोस्तिः। तदुक्तंसाहित्यदर्पणे। सचदानधर्मयुद्धैरयायासमन्वितश्चतुर्धास्यादिति। एतेषांस्थायिभावादीनांसमनंतरमेवहिरुद्भवदर्शनंरुतं। शांतरसस्तुसर्वैरालंकारिकैर्नस्वीकृतः। अपितुकैश्चिदित्यर्थः। इतरैर्नवभ्योरसेभ्योधिकोदशमोवत्सलतामपिरसोभाषितः। तत्स्नेहादयः क्रमेणस्थायिभावादयोज्ञेयाः। तत्रवत्सलतास्नेहःस्थायिभावः पुत्रादिरालंबनभावः। तच्चेष्टाविद्यागौर्यादय उद्दीपनभावाः। आलिंगनांगसंस्पर्शशिरश्चुंबनादयोनुभावाः। अनिष्टशंकाहर्षगर्वादयोव्यभिचारिभावाः। ययेष्टयकारैर्यगणैः सिंहविक्रीडनामास्यात्। तदुक्तंछंदोमणौ। ययेष्टयकाराः परंगुरुताम्वेत्तमाहुर्बुधाः सिंहविक्रीडनामानमत्रेसति। अयंचदशाक्षरगणः॥२७॥

रसस्यरेवरूपशब्दादिकस्तथैवभावरतिरित्यादिकोस्तियःपरोविशेषतोविचारस्तत्रपंडितैरुक्तारदर्पणमतापरुद्मुख्यतः॥ रसादिवि

श्रुतिप्रबोधिशास्त्रतोवगम्यतांमयात्रिहप्रसंगतोनिजोपयोगितत्स्वरूपमात्रमीरितंयथायथोस्तिलगास्तथाश्रृंगारोज्ज्वलरोभवेत्॥२८॥

रसस्येति॥पिंडैतैःरसस्यजातावेकवचनंरसानामित्यर्थः॥हेवाःकालादयःरूपाणिरूढ्यादीनिचपरस्परंशत्रुताचविशत्रुतानुभावव्यभिचारिस्थायिनस्तथैवभावानांनिर्वेदादीनांवैरिताआदिर्यस्यसःपरोन्योविशेषतोविचारःसमकाशादर्पणमतापरुशैमुख्योयुधेभ्योरसादीनांविस्तृतिविस्तरंप्रबोधयंतियानिशास्त्राणिग्रंथाःतेभ्यएवागम्यतांज्ञायतां।निदेशग्रंथयोःशास्त्रमित्यमरः।मयातुदृष्ट्यर्थेप्रसंगतःरसवदाद्यलंकारनिरूपणप्रसंगात्निजस्यस्वकीयानुक्रमागतालंकारनिरूपणस्योपयोगितेषांरसादीनांस्वरूपमात्रमीरितंकथितंअभविस्तरेणनिरूपणस्योपयोगाभावान्ननिरूपितमितिभावः।मतायथेप्सितंयथेष्टंलगाःलघुगुरवस्तदानंगशोरवरोभवेत्।तदुक्तंक्रमणौ।यथेष्टमेरुचामरमुकुनादुरीरितोबुधैरनंगशोरवराख्योदंडक इति॥२८॥

रसवदाद्यलंकारोपयोगिभावादीन्निरूप्येदानींतान्निरूपयति।रसवदिति।यदारसःशृंगारादिरितरस्यरसादेरंगतयाप्रतिभाति।तदारसवदलंकरणंस्यात्।तदुक्तंकुवलयानंदे।सरसोयत्रपरस्यांगभवतितत्ररसवदलंकारइति।उदाहरतिपुरेत्यादिना।शिखरपियोनिर्गतोकुरुसैन्यविनाशकरःसन्गुरुकर्णेसुवेधेखेयेषुतैरीरैःसहापियुयुधे।असावभिमन्युर्मद्देवशात्दैवाधीनतयाकर्थंनिहतुःशोषादिभिरितिशेषः।इत्यंमुधिष्ठिरोक्तिः।अथभानंकरुणरसःतस्यवीररसोंगं।योतिदुःखेनतरीतुमशक्यंजलधिंसमुद्रमपिलघुयन्होष्यंतद्वत्रसवत्तदलंकरणंहिरसस्यितरांगतयाप्रतिभातियथागुरुकर्णसुवेरपियोमुयुधेपिशिखःकुरुसैन्यविनाशकरोनितरामभिमन्युरसोमर्मद्देवशान्निहतः॥हकर्थंजयतिप्रबलोमरुद्दात्मजनिःसकपिःकिलयस्त्वतिदुस्तरमप्यतरज्जलधिं॥लघुयोष्यदवत्कथितैस्तुयथेप्सितसैःकथितःकुरुमास्तरणाभिधरंडकएषबुधैः॥२९॥

किल।समबलेमरुतोरयोरात्मजनिःपुत्रःकपिर्वानरःहनुमान्जयति।अत्रहकमहिषयकरतिरेरंगतरसोंगं।बुधैःकथितैःयथेप्सितसैःसगणैःकुरुमास्तरणइतिनामयस्यसःदंडकःकथितः।तदुक्तंक्रमणौ॥नतयत्रनिजेप्सितंकेवलंग्रथनंसमतःकविभिःकुरुमास्तरणइति॥२९॥

यक्तीति।यर्हिविभावैरनुभावैरभिव्यक्तीकृतोयःसंचारिभावःसःभावःभावपदवाच्यः।तथादेवतारतिर्देशिकोगुरुर्ब्रह्मक्षोणिपोराजाचब्राह्मणश्चातिथिर्यस्यरूप्यादेस्तस्मिन्नभिव्यज्यमानारतिरपिभावः।सभावोत्रपरस्परसादेरंगंस्यात्तत्रविज्ञैःप्रेयोलंकारउक्तः।तदुक्तंकुवलयाश्वतरीरसःकरुणरसस्यांगं।तथाअद्भुतरसोहनुमद्विषयकरतिभावस्यांगं।यक्तीकृतोयर्हिसंचारिभावोविभावैःसभावस्तथादेवतादेशिकक्षोणिब्राह्मणादावभिव्यज्यमानारतिश्चापिभावःसयत्रापरांगं।प्रेयानलंकारउक्तोनविज्ञैःकाहसकसोधेश्यतोहिवंद्यानतांपीनतुंगस्तनांस्वर्णवर्णांगभासुवेशींसन्निभागादमालिंग्यकांतांस्वकांतांसुरस्त्रीस्यां।शक्रादिदेवावलेपच्छिदंरावणंतंविनिर्जित्यकारायहेबंधनालयेस्थापयामासयस्तंसहस्रार्जुनंकार्तवीर्यंक्षत्रसंघास्थानेकवारंनिहंत्यैतदस्त्रैःपितॄन्स्वानतार्क्षी।योजामदग्न्यस्तमुत्कोस्मियावत्संतुहितावस्मृतस्तज्जयीमेघनीलंःशिरांघ्रेर्नुतोरामचंद्रंस्तुतोहंतमेवानमंतामयेशास्ततोगोनदाकामबाणः॥२९॥

नंदे।विभावानुभावाभ्यामभिव्यंजितोनिर्वेदादिरुत्तमयस्मिंश्चद्वेदेवतागुरुनृपद्विजकलत्रादावभिव्यज्यमानारतिश्चभावःसयत्रपरस्यांगंसप्रेयोलंकारइति।अहंशोभनेमोघेराजमंदिरेशयानःसन्चंद्राननांचारुनेत्रांपीनोन्नतस्तनीमृदुतनुंगोरुशोभनोयस्यास्तांस्वर्णस्यसुवर्णस्यवर्णवद्रंगोगकांतिर्यस्यास्तांउर्वशीतुल्यांकांतांमनोहरांस्वकांतांस्वस्त्रियंगाढंदृढंयथातथाआलिंग्यकरासक्तस्त्रीस्यांभवेयं।अत्रविप्रलंभशृंगारस्यकेतिपरस्परविनिवेशाख्यव्यभिचारिभावोंगं।योजामदग्न्यःपरशुरामःयःशक्रादिदेवानामबलेपंगर्वंछिनत्तिभृशंतंप्रसिद्धंरावणंविनिर्जित्यकारायहेबंधनालयेस्थापयासःतंसहस्रार्जुनंकार्तवीर्यंक्षत्रसंघास्थानेकवारंबहुवारंयथातथानिहत्यएतेषामस्त्रैःऋषिस्तुल्योहितावस्मेत्यमरःस्वानस्वकीयान्पितॄन्अतर्पयत्तर्पयामासाअंतर्भावितण्यर्थोयमतः सकर्मकः।पुष्पादितेपिस्पृशामृशारुचतृपेत्यनेनसिच्।अनुदात्तादित्वादात्मनेपदं।वरत्रजहलंवस्येतिरप्रत्ययः।तंजामदग्न्यंमणंनुनमस्कुर्नुयावदुकः उत्क्रांतोस्मितावत्तंजामदग्न्यंजयत्यसौतज्जयीमेघनीलंःशिरांघ्रेर्नुतःस्तुतोरामचंद्रःस्मृतःततोहंतमेवानमंतमनमस्करवं।अत्रश्रीरामचंद्रविषयकरतिभावस्यपरशुरामविषयकरतिभावोंगं।यदायथेष्टंताःतगणाःततोगोरुद्वयंतदाकामबाणनामादंडकाः।तदुक्तंक्रमणौ।पूर्वंनुहीरायथेष्टंततोहारयुग्मंभवेत्तत्रसौभाग्यहींश्रादिभिःकामबाणइति॥२९॥

स्फुटचमत्कृति। इहभावोरसश्चानौचित्यतः अनुचितत्वेनप्रवृत्तोस्तिचेत्तर्हिस्फुटचमत्कृतिः कुमारेनंभावंरसंचभावाभासंरसाभासंचाहुः उ
अत्रकरेतिपदसूचितंविभावाख्योभवःशृंगाररसस्यांगं॥ तथाश्रीरामविषयकरतिभावस्य उक्तोस्तिप्रबन्धेतु मितिपदसूचित
परशुरामविषयकरतिभावोंगं॥सकर्मयइहभावाभासमाहुरसाभासमेनंह्यनौचित्यतश्चेत्प्रवृत्तौस्तिभावोरसस्फुटमात्तर्हिचेतोप
रागभवेत्तांतरोर्जस्विसंज्ञस्त्वलंकारउक्तः। जयसिजयसिराजेंस्त्वंयशोवीर्यवंतोपियुधेपुधुधेषुशत्रून्निजाननाशयतस्त्वदीयाहिपंतो
धरामप्रतापंस्वरोनिर्जिताब्धेतभूमंडलंवीक्ष्यहितां। प्रणमिद्धिरसोत्संसुवतीहसाशीनिवासाजपंतीहवर्मदिनेत्रंसरूपंजगद्भवयं
तोखिलैर्वंदितायासमालोक्यतारुण्यभारोल्लसत्कांतिपूरः॥भवतियुवतिसंघातोहि नित्यंनितांतंसमाश्लेष्टुकामोहिनाकीर्तितः षट्
लकारास्त्रयोगास्त्रयः स्फुस्तत्रश्येथेष्टयकारास्तदादंडकोमेघमालाभिधानः॥२९॥

तौभावाभासरसाभासौपरस्परसादेरंगंभवेतांचेत्तदातर्हिऊर्जस्विदाख्योलंकारउक्तः। तदुक्तंकुवलयानंदे। अनौचित्येनप्रवृत्तोरसोभावश्च र
साभासोभावाभासश्चेत्क्रमेण्यते। सयत्रपरस्यांगंतत्रोर्जस्वदिति। हेराजन्त्वंजयसि। नित्यवीरयोरित्यनेननित्यार्थेद्विः। यतःइहलोकेयु
धेषुनिजाननशत्रून्नाशयंतीतएवशौर्यवंतोपितवभूमेस्तदीयाःद्विषंतःशत्रवोयस्मात्तस्मात्तवप्रतापोयस्यतंस्वदोर्भ्यांस्वबाहुभ्यांनिर्जितंअब्धं
तंसमुद्रांतंभूमंडलंवीक्ष्यदृष्ट्वाअत्यंतंमाणमितानिनम्रीकृतानिशिरांसियेस्तथाभूताःसंतःस्तुवंति। अत्रशत्रुसंबंधिराजविषय
करतिभावस्यशत्रुसंबंधित्वेनौचित्यप्रवृत्तेतयाभावाभासत्वं। सराजविषयकरतिभावस्यांगं। इहकाश्यांनिवासोयेषांतेजगत्
ब्रह्मरूपंभावयंतोतएवाखिलैःसर्वैर्वांछिताःकर्मेंद्रियःपरिव्राजकाभिक्षुकाःपरिव्राट्कर्मेत्यमरः। जयंतिउत्कर्षेणवर्त्तते। मतोयान्
समालोक्यतारुण्यभारः तारुण्यातिशयस्तेनोल्लसन्कांतीनांपूरःसमुदायोयस्यसः युवतीनांसंघातःसमूहःनित्यंनितांतंआश्लेष्टुंआ
लिंगितुकामोयस्यतथाभूतोभवति। तुंकाममनसोरपीतितुनुनोमकारलोपः। अत्रशृंगारस्यकामयतिसंबंधित्वेनौचित्यमप्रवृत्त
तयारसाभासत्वं। सयतिविषयकरतिभावस्यांगं। ओरोषट्लघवस्तत्रस्त्रयोगाःपुरवस्त्रयोयथेष्टंयकाराःयगणास्त्रयश्चेत्तत

हिंअहिनाथिंगलनागेनमेघमालानामदंडकः। कीर्तितः। तदुक्तं। तत्रारसलघुरिविहारेभ्योयथेष्टंयकारेर्गतोमेघमालाभिधोदंडकोयमिति।
अयंषोडशगणः॥२९॥

प्रशमिति। इहप्रशमभावः प्रशमंशांतिंआयत्प्रायुवन्भवतितदापंडितैर्भावशांतिरुदीरितःकथितासापरस्परसादेरंगतामागतामाप्ता
चेत्तर्हिसमाहितोलंकारोभवति। तदुक्तंकुवलयानंदे। भावस्यप्रशमोभवत्प्रशमभावशांतिः तस्याःपरांगत्वेसमाहितमितिः यहिवर्णप्रभाव
माश्रितः। अरातिसंघः शत्रुसमूहोतीर्ष्यामभ्युद्यतः। तदारोषणेकोपनेसमरेरणेतोषितः ईशः ईश्वरोयेननस्मिन्अर्जुनेयुधेशौर्यं
प्रवीणंकर्णआक्रंदीप्रनिहत्यहिपूर्वंहंतुकामोयस्यतथाभूतेसतिमहान्द्विषांशत्रूणांचयःसमूहः साध्वसात्भयात्सपदिआनेनेनृपं

अत्रशत्रुसंबंधिराजविषयकरतिभावः शत्रुसंबंधित्वरूपानौचित्यप्रवृत्ततया। शोभशोभोयंभावाभासः समभुविषयककविरतिभाव
स्यांगंतयाशृंगारस्यअनिष्टयतिविषयतयाप्रवृत्तत्वरूपानौचित्यप्रवृत्ततयारसाभासत्वं। सकर्मेदिविषयकरतेरंगंप्रशमिह
भावआप्तोयदाभावशांतिस्तदोदीरितापंडितैः सापरस्यांगतामागतावेत्तदा। भवतिहिसमाहितालंकृतिर्यहिकर्णप्रभावाश्रितोतीर्ष्य
मायुध्यतारातिसंघस्तदारोषणे। सतिसमरतोषितेशोर्जुनेयुध्यशौर्यंनिहत्याक्रकर्णेरिपून्हंतुकामेनतोद्विषच्चयःसाध्वसात्। स
परिवृणमाननोन्विष्यतिस्मगृहीतुंयदापंचलाघायथेष्टास्तदाचंडकालस्तदाहृणादिपदसूचितः॥२९॥

लिकघनानांनैत्याभावात्। चित्रोक्तायंनदोषः। यथा। अहोविकसनिंद्यकंनक्तंसुंदरिसारसं। सारसंकमलं। तयोर्विषमसयोः कर्म
त्। दृष्टाः चतुर्दशैकादशचलाश्चेन्नहिभ्रमरविलासः स्यात्। तदुक्तं। ओजेडायुजिदामानाभ्रमरविलासोमतइति॥४८॥ भूछायेति। र
वौसूर्येभूछायायाछन्नेसतिसूर्यग्रहणेसतीत्यर्थः। उच्चौतुंगौकठिनौकशौर्कुचौयस्याःसेयंरत्नावली। ति। अत्रसूर्यग्रहणेभूछा
यायाछन्नत्वंरवेर्ज्योतिःशास्त्रविरुद्धं। तत्रहिचंद्रबिंबछन्नतायाःप्रतिपादनात्। रत्नावल्याउच्चकठिनकुचत्वमवस्थाविरुद्धं। रत्नावस्थायां
कुचयोरुच्चत्वकठिनत्वयोरभावात्। आपदिपदृगृहीतेषुलोः। कविरुद्धंयथा। वाजिवहतिवृंहितं। वृंहितंनामकरिगर्जितंतस्यलो
क्तत्वात्लोकविरुद्धं। प्रसिद्धिविरुद्धयथा। चक्रेचक्रायुधंस्मरः। विष्णोःस्मरजन्यत्वस्यप्रसिध्यभावात्प्रसिद्धिविरुद्धं। उन्मेषाया

अत्रप्रथमचरणेद्रव्यविरुद्धं॥ द्वितियेदेशविरुद्धं। तृतीयेकालविरुद्धं॥ भूछायाछन्नेरवौ॥ स्यात्युच्चकठि
णकुचा॥ वृत्थेयंतयोर्डंटलाः॥ कुरुमाकुलमधुकरः॥४९॥ ॥ ॥ ॥

मयंनदोषः। संप्रदायविरुद्धंयथा। पतिःपक्षापीनामथमंबुराशिमिंदुछविंबिंदुमिवाललंघे। आधिश्याम इतिकविसंप्रदायाद
ध्याविदुछविंबंसंप्रदायविरुद्धं। एवंयुक्तिविरुद्धायुदाहरणीयं। तयोर्विषमसमयोः कर्मात्दृष्टाः चयोदशैकादशचलाश्चेन्नहि
कुरुमाकुलमधुकरःस्यात्। तदुक्तं। ओजेडायुजिदाःकलाःकुरुमाकुलमधुकर इति॥४९॥ कोपीति। कोपिहेतुश्चेन्विरुद्धक
थनेकिमपिकारणंफलंवाचेत्तहिएतद्द्रव्यविरुद्धादिवर्ण्यंवक्तव्यं। यथा। शशशृंगजंशशशृंगभवंधनुर्यस्यसशशशृंगजध
न्वा। धनुषश्चेत्यनङ्समासांतः। वंध्यायाःसुतः अस्यराज्ञोयोद्वाप्रतिभटोभवेदितिशेषः। अत्रशशशृंगेत्यादिलोकविरुद्धक
थनंतुस्यराज्ञःप्रतियोद्वानास्तीत्यर्थप्रतीपादनफलकमित्यदोषः। रसभावादीनांस्वशब्दवाच्यतादोषएव। तयोर्विषमस

DR. BHAU DAJI
डाक्टर भाऊदाजी इंस्टीट्यूट रिसर्च सोसायटी
M.

मयोःयत्राःसमदृशश्चलाश्चेन्नहिकिंनरलीलास्यात्। तदुक्तं। किंनरलीलासमदृशासमेसमकेदृशामाभाइति॥५०॥ इत्य
ष्टादशार्थदोषा॥ ॥ इतिसाहित्यमंजूषाटीकायांकुविकासमख्यायांमाभाछंदोनिरूपणंनामपंचमोध्यायः॥५॥ ॥
अथषष्ठाध्यायेमायुक्तोक्तादिज्ञातीनांभेदादिज्ञानायप्रत्ययानाह। यत्रेति। अत्रशास्त्रेयेरत्नानामनुष्टुबाद्यंतर्गतभेदानांम
त्ययकरणात्प्रतीतिकरणाद्धेतोः। प्रत्ययाभिदाःप्रत्ययनामकाःसंति। तेप्रस्तृताश्चनष्टंचोद्दिष्टंचैकद्यादिगलक्रियाचसं
ख्याचाध्याचेतिषड्वर्तंतेइत्यन्वयः। प्रस्तृतिरितिस्तृणोतेःक्तिन्प्रत्ययः। तदुक्तंरत्नाकरे। प्रस्तारोनष्टमुद्दिष्टमेकद्यादि

अत्रप्रथमे। ज्योतिःशास्त्रेभूछायाछन्नत्वंचंद्रस्यरवेस्तुचंद्रछन्नत्वमतआगमविरुद्धं। द्वितीयत
तीयेअवस्थाविरुद्धं। कोपिहेतुश्चेन्नेतद्वर्ण्यं। शशशृंगजधन्वा। वंध्यास्तस्ययोद्धातयोस्तन्वा
किंनरलीला॥ अत्रशास्त्रविरुद्धकथनंतस्यनिरूपस्यकोपियोद्धानास्तीतिसूचकंहेतुकं। इत्यष्टाद
शार्थदोषाः॥ इतिमाहित्यपंचमोध्यायः॥ अथप्रत्ययः॥ ॥येनप्रत्ययकरणाद्धेतानांप्रत्ययाभिधाःप
द्धते। प्रस्तृतीनष्टोद्दिष्टैकद्यादिगलक्रियाश्चसंख्याध्या॥५१॥ विषमार्धसमसमानांरत्नानांप्रस्तृतिश्च
नष्टंच। उद्दिष्टैकादिगलक्रियेचपद्यार्धपादैःस्युः॥ ५२॥ ॥ ॥ ॥

गलक्रिया। संख्यानमध्ययोगश्चषडेतेप्रत्ययाःस्मृताइति॥५१॥ विषमादिछंदसांप्रस्तारादिक्रियायांपद्यादिनियममाह। वि
षमेति। एवंचविषमरत्नस्यप्रस्तारादिक्रियाःपद्येनभवंति। अर्धसमरत्नस्यताःपद्यार्धेनभवंति। समरत्नस्यपादेनभवंतीत्य
र्थः॥५२॥

वर्णमात्रामेदेनछंदसोद्वैविध्यात्प्रस्तारादीनामपिद्वैविध्यं॥तत्रवर्णप्रस्तारंद्वाभ्यामाह।यथयदिति।यस्ययस्यछंदसःप्रस्तितिःप्रस्तारःस्थापनीयास्थापयितुमर्हीछापयितुमर्हास्थापयितुमिष्टेतियावत्।तस्यतस्यछंदसोभेदानांसंख्ययामितान्परिगणितान्अन्योन्येनैकेनांतहितान्व्यवहितान्ग्लानून्गुरुलघून्आदिपंक्तौप्रथमपंक्तौऊर्ध्वाधर्वात्ऊर्ध्वाधरक्रमेणलिखेत्।बुधइत्कत्तरपद्यस्यछंदःकर्तानुसंधेयः।तस्याआदिपंक्तेःपरास्मपंक्तिषुस्वस्वस्यादिपंक्तौगतायेगलाःगुरुलघवः।तद्विगुणैर्गलैर्गुरुलघुभिरंतर्हितान्व्यवहितान्ग्लान्गुरुलघून्परिलिखेत्।इदानींकतिपंक्तयोलेखनीयाइत्यपेक्षायामाह

अथवर्णप्रस्तारः॥ ॥यद्यछंदःप्रस्तृतीस्थापनीयातत्तछंदोभेदसंख्यामितान्ग्लान्॥अन्योन्यैकांतर्हितानादिपंक्तावोर्ध्वोर्ध्वमादालिखेत्तत्परास्रक्॥५३॥स्वस्वादिपंक्तिगगलद्विगुणैर्गलैर्ग्लानंतर्हितान्परिलिखेत्बुधआलयस्रक्॥स्रक्प्रस्तितीर्षितस्रक्तगर्वणंसंख्याअर्धंगयुक्लयुतमर्धंमिहांतिमायाः॥५४॥ ॥ ॥ ॥ ॥ ॥

आलयइति।इहयस्यछंदसःप्रस्तारइष्टस्तस्यछंदसोर्णानांवर्णानांसंख्यैवसंख्यायासांताःतद्वर्णसंख्याःआलयःपंक्तयोलेखनीयाः।अयमर्थः।समवृत्तप्रस्तारेपादवर्णमितपंक्तयोलेख्याः।अर्धसमवृत्तप्रस्तारेपद्यार्धवर्णमितपंक्तयः।विषमवृत्तप्रस्तारेपद्यवर्णमितपंक्तयइति।इहांतिमायाःपंक्तेरर्धंगयुक्गुरुयुक्कंअर्धंलघुतंलघुसुक्कंभवति।तदुक्तंयुमणेगधरेलघोपितौतद्विगुणाःभवतिजातितयुरोभागे।गोर्धंलोर्धंयादिचेत्प्रस्तारःस्यादनेनविधिनापीति।प्रस्तारादिलेखनेगुरुर्वंक्रलेरवारूपोलघुःसरलेरेखारूपइतिसंज्ञाप्रकरणोक्तमनुसंधेयं।समवृत्तादिप्रस्तारस्थापनंमूलेएवोक्तं।तत्रसमवृत्तगद्यस्यरपादजातिमध्याप्रस्तारेप्रथमपंक्तावादौगुरुस्तदधोभागेलघुःतद्धोगुरुरित्यन्योन्यक्रमेणद्व्यक्षरपादजातेरष्टौभेदाभवंतीत्यतोष्टौगुरुलघवोलिखिताः।ततोद्वितीयपंक्तावादौप्रथमपंक्तिगैकगुरोरधस्तात्पंक्तिद्वयगुणोद्वौगुरूलिखितौ।तदधोद्वौलघूतदधोद्वौगुरुरितिक्रमेणद्वाभ्यांद्वाभ्यांव्यवहितागुरुलघवोलिखिताः।ततस्तृतीयपंक्तावादौद्वितीयपंक्तिगोर्ध्वगुरुद्वयापेक्षयाद्विगुणाश्चत्वारोगुरवस्तदधश्चत्वारोलघवोलिखिताः॥तृतीयपंक्तेरर्धंगुरवोर्धंलघवश्चजाताःअत्रप्रथमोभेदः।सर्वगुरुर्द्वितीयआदिलघुस्तृतीयोमध्यलघुरित्यादयःक्रमेणमयःरसतजभनगणसंज्ञकाअष्टौभेदाभवंति।एवंचतुरक्षरपादजात्यादीनांप्रस्तारोज्ञेयः।एवमर्धसमविषमवृत्तप्रस्तारोपि।ततैतावन्विशेषः।अर्धसमेपद्यार्धगतवर्णसंख्याकाःविषमेपद्यगतवर्णसंख्याकाश्चपंक्तयः।मूलेतर्धसमविषमवृत्तप्रस्तारस्थापनस्यादिकूटदर्शनंकृतं।तत्रार्धसमोदाहरणेप्रथमेचरणेगुरुत्रयंद्वितीयेगुरुचतुष्टयं।अस्याष्टाविंशत्यधिकशतंभेदाभवंति।तावंतआद्यपंक्तावूर्ध्वाधरक्रमेणाद्यौगुरुस्ततोलघुस्ततोगुरुरित्यादयस्थापनीयाः॥द्वितीयपंक्तौद्वौगुरुस्ततोद्वौलघूइत्यादयःस्थापनीयाः।तृतीयपंक्तौचत्वारोगुरवस्ततश्चत्वारोलघवइत्यादयःस्थापनीयाः॥एवंचतुर्थपंक्त्यादावष्टगुर्वादयोज्ञेयाः।विषमोदाहरणेप्रथमेचरणेगुरूणांत्रयंद्वितीयेचतुष्टयंतृतीयेपंचकंचतुर्थेषट्कं।अस्यद्वेलक्षेद्विषष्टिःसहस्राणिचतुश्चत्वारिंशत्यधिकैकशतंच॥२६२१४४॥भेदाभवंति।तावंताआद्यपंक्तावूर्ध्वाधरक्रमेणाद्यौगुरुस्ततोलघुस्ततोगुरुरित्यादयः॥स्थापनीयाः॥द्वितीयपंक्तावादौगुरुद्वयंततोलघुद्वयमित्यादिपूर्ववज्ज्ञेयं॥५३॥५४॥अथद्वितीयनष्टवृत्तस्वरूपज्ञानार्धंवर्णनष्टंद्वाभ्यामाह।एतत्संख्येति।एषासंख्यायस्यातस्मैतत्संख्याछंदसःप्रस्तारःगुरुलघ्वात्मकःसंस्थाविशेषःछंदस्तप्रस्तरितुमिष्टंस्वाभिमतंयस्यं।साकीदृशीस्यादित्येवंप्रश्नंप्रश्नविषयवृत्तंनष्टमाहुः।मध्यायाःपंचमोभेदःगौरगौरित्येतज्जातीयप्रश्नगतस्वरूपज्ञानसाधनंनष्टशब्दवाच्यमित्यर्थः।तत्नष्टं।तद्द्वितीयस्यद्वितीयपद्यांत्यस्यादित्यनेनसंबंधः।अस्मिन्नष्टेकेआजेविषमेसति।आदौगुरुंसंलिख्ययुग्मेसमेसतिलंलघुंलिख्यततस्तदनंतरम

वर्णमात्रामेदेनछंदसोद्वैविध्यात्प्रस्तारादीनामपिद्वैविध्यं॥तत्रवर्णप्रस्तारंद्वाभ्यामाह।यथादिति।यस्यस्यछंदसःप्रस्तारःस्थापनीयास्थापयितुमर्हीछापयितुमर्हास्थापयितुमिष्टेतियावत्।तस्यतस्यछंदसोभेदानांसंख्ययामितान्परिगणितान्अन्योन्येनैकेनांतरहितान्व्यवहितान्ग्लान्गुरुलघून्आदिपंक्तौप्रथमपंक्तौऊर्ध्वाधर्यात्ऊर्ध्वाधरक्रमेणलिखेत्।बुधइत्कर्तरिषष्ठ्यंतःकर्तानुसंधेयः।तस्याआदिपंक्तेःपरासुपंक्तिषुस्वस्वस्यादिपंक्तौगतायेगलाःगुरुलघवः।तद्विगुणैर्गलैर्गुरुलघुभिरंतरहितान्व्यवहितान्ग्लान्गुरुलघून्परिलिखेत्।इदानींकतिपंक्तयोलेखनीयाइत्यपेक्षायामाह

अथवर्णप्रस्तारः॥ ॥यथछंदःप्रस्तृतीस्थापनीयातच्छंदोभेदसंख्यामितान्ग्लान्॥अन्योन्यैकांतरहितानादिपंक्तावूर्ध्वोर्ध्वार्धादालिखेत्तत्परासु॥५३॥स्वस्वादिपंक्तिगगलद्विगुणैर्गलैर्ग्लानंतरहितान्परिलिखेत्सुधआलयस्तु॥स्यःप्रस्तितीर्षितस्तद्गतवर्णसंख्याअर्धेगयुक्गुरुयुतमर्धमिहांतिमायाः॥५४॥ ॥ ॥ ॥ ॥ ॥

आलयइति।इहयस्यछंदसःप्रस्तारइष्टस्तस्यछंदसोर्णानांवर्णानांसंख्येवसंख्यायासांताःतद्वर्णसंख्याःआलयःपंक्तयोलेखनीयाः।अयमर्थः।समवृत्तप्रस्तारपादवर्णमितपंक्तयोलेख्याः।अर्धसमवृत्तप्रस्तारेपद्यार्धवर्णमितपंक्तयः।विषमवृत्तप्रस्तारेपद्यवर्णमितपंक्तयइति।इहांतिमायाःपंक्तेरर्धेगयुक्गुरुयुक्तंअर्धेलघुतंलघुयुक्तंभवति।तदुक्तंद्युमणेगधरेलघोपितौतद्विगुणाःप्रतिजातितत्पुरोभागे।गोर्धेलोर्धेयदि चेत्प्रस्तारःस्यादनेनविधिनापीति।प्रस्तारादिलेखनेगुरुर्वक्रलेरवारूपोलघुःसरलरेरवारूपइतिसंज्ञाप्रकरणोक्तमनुसंधेयं।समवृत्तादिप्रस्तारस्थापनंमूलेएवोक्तं।तत्रसमवृत्तगद्यस्यरपादजातिमध्याप्रस्तारेप्रथमपंक्तावादौगुरुस्तदधोभागेलघुःतद्धोगुरुरित्यन्योन्यव्यवधानक्रमेणगद्यस्यरपादजातेरष्टौभेदाभवंतीत्यतोष्टौगुरुलघवोलिखिताः।ततोद्वितीयपंक्तावादौप्रथमपंक्तिगैकगुरोरपेक्षयाद्विगुणौद्वौगुरूलिखितौ।तदधोद्वौलघूतदधोद्वौगुरुइतिक्रमेणद्वाभ्यांद्वाभ्यांव्यवहितागुरुलघवोलिखिताः।ततस्तृतीयपंक्तावादौद्वितीयपंक्तिगोर्ध्वगुरुद्वयापेक्षयाद्विगुणाश्चत्वारोगुरवस्तदधश्चत्वारोलघवोलिखिताः॥तृतीयपंक्तेरर्धेगुरवोर्धेलघवश्चजाताअत्रप्रथमोभेदः।सर्वेगुरुर्द्वितीयआदिर्लघुस्तृतीयोमध्यलघुरित्यादयःक्रमेणमयरसतजभनगणसंज्ञकाअष्टौभेदाभवंति।एवंचतुरक्षरपादजात्यादीनांप्रस्तारोज्ञेयः।एवमर्धसमविषमवृत्तप्रस्तारोपि।ततैतावन्विशेषः।अर्धसमेपद्यार्धगतवर्णसंख्याकाःविषमेपद्यगतवर्णसंख्याकाश्चपंक्तयः।मूलेतर्धसमविषमवृत्तप्रस्तारस्थापनस्यादिकूटदर्शनंकृतं।तत्रार्धसमोदाहरणेप्रथमेचरणेगुरुत्रयंद्वितीयेगुरुश्चतुष्टयं।अस्याष्टाविंशत्यधिकशतंभेदाभवंति।तावंतआद्यपंक्तावूर्ध्वाधरक्रमेणाद्यौगुरुस्ततोलघुस्ततोगुरुरित्यादयस्थापनीयाः॥द्वितीयपंक्तौद्वौगुरुततोद्वौलघूइत्यादयःस्थापनीयाः।तृतीयपंक्तौचत्वारोगुरवस्ततश्चत्वारोलघवइत्यादयःस्थापनीयाः॥एवंचतुर्थपंक्त्यादावष्टगुर्वादयोज्ञेयाः।विषमोदाहरणेप्रथमेचरणेगुरूणांत्रयंद्वितीयेचतुष्टयंतृतीयेपंचकंचतुर्थेषट्कं।अस्यद्वेलक्षेद्विषष्टिःसहस्राणिचतुश्चत्वारिंशत्यधिकैकशतंच॥२६२१४४॥भेदाभवंति।तावंतआद्यपंक्तावूर्ध्वाधरक्रमेणाद्यौगुरुस्ततोलघुस्ततोगुरुरित्यादयः॥स्थापनीयाः॥द्वितीयपंक्तावादौगुरुद्वयंततोलघुद्वयमित्यादिपूर्ववन्ज्ञेयं॥५३॥५४॥अथद्वितीयनष्टवृत्तस्वरूपज्ञानार्धवर्णनष्टंद्वाभ्यामाह।एतत्संख्येति।एषासंख्यायस्यातस्मैतत्संख्यछंदसःप्रस्तिःगुरुलघ्वात्मकःसंस्थाविशेषःछंदस्तप्रस्तरितुमिष्टंस्वाभिमतंयस्यासौ।साकीदृशीत्यादित्येवंप्रश्नंप्रश्नविषयवृत्तंनष्टमाहुः।मध्यायाःपंचमोभेदःगीदृगीत्येतज्ज्ञातीयप्रश्नगतस्वरूपज्ञानसाधनंनष्टशब्दवाच्यमित्यर्थः।तत्तन्नष्टं।तद्द्वितीयपद्यांत्यस्यादित्यनेनसंबंधः।अस्मिन्नष्टेकेआद्येविषमेसति।आदौगुरुंसंलिख्ययुग्मेसमेसतिलंलघुंलिख्यतत्तदनंतरम्

स्यनष्टांतकस्यार्धकार्यं।नष्टोक्ताजोविषमश्चेत्तर्हितस्मिन्नेकमंकमंकमाधायमिश्रयित्वातत्।अर्धंस्यात्।कुर्यादित्यर्थः।अर्धंयं
केओजेविषमेसतिगंगुरुंलिखेत्समेसतिलंलघुंलिखेत्।इदानीमप्यर्धकेओजेसत्येकमंकंमिश्रयित्वाभूयःपुनरर्धंकुर्यात्।ए
तत्कतिवारंकुर्यादित्यपेक्षयाह।एतदिति।एतत्पुनःपुनरर्धकरणंगुरुलघुलेखनंचरत्नवर्णावधिरत्नवर्णपरिपूर्तिपर्यंतंकुर्यात्।स
मेरत्नेपाद्वर्णपरिपूर्तिपर्यंतंअर्धंसमेपद्मार्धवर्णपरिपूर्तिपर्यंतंविषमेपद्मवर्णपरिपूर्तिपर्यंतंकुर्यात्इत्यर्थः।तदुक्तंरत्ना
करे।नष्टस्ययोयोभवेदंकस्तस्यार्धंसमेचलं।विषमेचैकमाधायतदर्धंगुरुभंवेदिति।अत्रोद्दरणं।मध्यायाःपंचमोभेदः

अथवर्णनष्टं॥एतत्संख्याछंदसःभस्तुतिःस्यात्कीदृग्येवंप्रश्नमाहुर्नष्टं॥तत्रैजेंकेस्मिन्गुरुंलघुंतुयुग्मेसंलि
स्याद्दीकार्यमर्धंततोस्य॥५५॥आजोक्त्रेरेकमाधायतत्स्याद्धैंय्योजेगंसमेलंलिखेत्स्यात्॥अर्धंत्वोजेमि
श्रयित्वैकमर्धंमुयस्तेत्रत्नवर्णावधिस्यात्॥५६॥अथवर्णोद्दिष्टं॥प्रस्तारेरत्नमेतत्कतममितिपरिप्रश्नमुद्दि
ष्टमाहुस्तत्तुस्यात्॥पृष्टवृत्ताक्षरगणमखिलंतिर्यगालौविलिख्य॥तन्मूर्धस्थादिवर्णाद्द्विगुणितगणनानेक
मारभ्यचांकान्त्यैचस्फलींर्ध्वगांकारचयतुमितिमांस्तान्विमिश्राश्चसैकान्॥५७॥ ॥ ॥

कीदृगितिकेनचित्पृष्टेतस्यपंचमांकस्यविषमत्वात्॥ततःपंचत्वसंख्यायाविषमत्वात्।एकांमिश्रणेनषट्जाताः।तषःप
मर्धेत्रयः।तस्यत्रित्वसंख्यायाविषमत्वाद्गुरुंलिखेत्।ततस्त्रित्वसंख्यायाविषयत्वादेकयोजनेनचत्वारोजाताःतदर्धंदौ।द्वित्व
संख्यायाःसमत्वाल्लघुंलिखेत्।तत्रैवपादाक्षरपूर्तिर्जातेतिपुनरर्धादिनकर्तव्यं॥एवंचमध्यायाःपंचमोभेदौत्यलघुप्लग
णात्मकोजाताः।यथा।।।एवनष्टांतरमुदाहरणीयां॥५५॥५६॥अथनिर्णेतुस्वरूपस्यरत्नस्यस्थानविशेषज्ञानार्थंवर्णो
द्दिष्टंतृतीयप्रत्ययमाह।प्रस्तोरेरत्नमेतदिति।प्रस्तारेएतत्पृष्टंरत्नंकथितंकिंस्थानीयमितिपरिप्रश्नंप्रश्नोत्तरदान

साधनमद्दिष्टमाहुः।मध्यप्रस्तारेत्यगुरुरूपोभेदःकतिथइतिप्रश्नोत्तरदानसाधनमनुपदक्ष्यमाणमुद्दिष्टशब्दवा
च्यमित्यर्थः।उद्दिष्टशब्दार्थंनिरूपयेतद्दनमेतत्संख्याकमितिवक्तुंतद्दतसंख्याज्ञानायसाधनमाह।तत्तुस्यात्पृष्टरत्नेत्या
दिना।अखिलंपृष्टवृत्तस्याक्षराणांगणंसमुदायंतिर्यंगालौतिर्यक्पंक्तौविलिख्यतेषांलिखितवर्णानांमूर्धस्थउपरिभागेषु
एकमंकमारभ्यआद्यवर्णात्प्रथमवर्णात्सकाशात्द्विगुणितागणानायेषांतानंकान्एकद्वित्रचतुरादिन्विलिख्यअत्रयेलो
र्ध्वगांकाःलघुवर्णोर्ध्वभागगतांकाःस्युः।तानंकान्विमिश्रितान्संकलितान्सैकान्एकांकेनसहितांश्चरचयतुरचयेत्।ए
वंलतेएवंलतेतदुद्दिष्टमित्यन्वयः।कथितमित्यनेनपूरणार्थेउद्दिष्टगागमः॥अत्रोदाहरणं॥मूलेलि

अथवर्णसर्वैकाद्दिगलक्रिया॥रत्नप्रस्तारभेदेषुसर्वैकाद्दिगलास्तुये॥भेदज्ञातुंहितत्संख्यामेकाद्यादिगलक्रिया॥५८॥

खितंतत्रमध्यायाअत्रलघुभेदःकस्मिन्स्थानेस्तीतिप्रश्नेभेदाक्षराणितिर्यक्पंक्तौलिखितानि॥अथप्रथमाक्षरोपरिएकांक
कः।द्वितीयाक्षरोपरिप्रथमांकाद्दिगुणितौद्वावंकौतृतीयाक्षरोपरिद्वितीयांकाद्दिगुणिताश्चत्वारोंकाश्चलिखिताः।तत्रलघ्वक्ष
रस्याश्चत्वारः।तेचैकांकेनमिश्रिताश्चेत्पंचभवंति।तत्संख्याकोभेदः।एवंचमध्यायाःपंचमोभेदइतिकथनं॥मध्यायाअत्यगुरु
भेदःकथितइतिप्रश्नेपूर्ववद्भेदवर्णास्तपर्यंकाध्यस्थाप्याः।यथा।अत्रलघुस्त्रयेकद्व्यंकौ।तर्योमिश्रेणत्रयोभवंति।तेचैकांकेनमि
श्रिताश्चत्वारोभवंति॥तत्संख्याकंचतुर्थंरत्नमितिफलति॥५७॥ ॥अथचतुर्थप्रत्ययैकद्व्यादिगलक्रियामयोजनमाह।रत्नप्र
स्तारेति।रत्नप्रस्ताराणांभेदेषुयेसर्वैकाद्रयःसर्वैकद्व्यादयोगलाः।गुरुलघवोयेषुतेसर्वैकादिगलाः।भेदाःसंति।तेषामेकगु
र्वादिभेदानांसंख्यांज्ञातुंएकद्व्यादिगलक्रियाउच्यतइतिशेषः॥५८॥ ॥ ॥ ॥ ॥

तामेवक्रियाद्वाभ्यामाह।सार्धोर्ध्वेति। बुधःअर्णसंख्याकान्समवृत्तेपादवर्णसंख्याकान्अर्धसमेषद्यार्धवर्णसंख्याकान्विषमे षद्यवर्णसंख्याकान्एकांकेनसहितान्एकांकान्एकसंज्ञकान्ऊर्ध्वाधरभावेनन्यस्यस्थापयित्वाप्रथमायामात्रौ अंतिममंकंऊर्ध्वेतदूर्ध्वंकेमिश्रयातुमिश्रयेत्। अथतंमिश्रितांकंतदूर्ध्वेमिश्रयेत्।इतिचरमावधिचरमांकावधिमिश्रयेत्। चरमेनमिश्रयेदितिभावः। अन्यास्तद्द्वितीयादिद्व्यादृत्तिषुतथैवअंत्यमंकंतदूर्ध्वांकेतमंकंतदूर्ध्वांकेमिश्रयेत्।परंतुद्वहस्त स्यस्वस्यापेक्षयाप्रथमादृत्तिरादारत्तिस्तस्यांप्रमिश्रितोयोंत्यांकस्तंविहायत्यस्कामिश्रयेत्।अत्रोदाहरणं।मध्यामस्तारेए

सार्धोर्ध्वाधर्येणैकांकान्न्यस्यार्णसंख्यकान्सैकान्॥प्रथमायामादृत्तावंतिममूर्ध्वेधतंतदूर्ध्वइति॥५९॥
चरमावधिमिश्रयेत्तुत्रयादृत्तिषुतथैवच।परंतुद्वहस्त स्यस्वस्यापेक्षयाप्रथमादृत्तिप्रमिश्रितोयोंत्यांकमिहविहायबुधः॥६०॥

कगुर्वादिभेदाःकतिसंतीतिप्रश्नेसाःसमवृत्तत्वात्सादवर्णसमानसंख्याकास्त्रयोंकाःतेचैकांकेनसहिश्लारोजातास्तावंतएकांकाऊर्ध्वाधरभावे नलिखितव्याः।यथा।२ तत्रप्रथमांकोद्वितीयांकेमिश्रितश्चेद्द्व्यंकोभवति।सचतृतीयांकेमिश्रितश्चेत्त्र्यंकोभवति।सच त्र्यंकश्चतुर्थांकेनमिश्रि २ तव्यःअंकमिश्रणस्यांत्यावधीत्यत्वात्।एवंचप्रथमादृत्तावेकोद्वौत्रयएकश्चांकाजाताःयथा ३ ततोद्वितीयादृत्तावधस्तनएकांकःसोर्ध्वेद्व्यंकेमिश्रितश्चेत्त्रयोभवंतिसचत्र्यंकःसोर्ध्वेत्र्यंकेनमिश्रितव्यःस्वस्व २ थमादृत्तिप्रमिश्रितांत्यांकंविहायमिश्रयेदित्युक्तं।एवंचद्वितीयादृत्तौएकांकस्त्र्यंकएकांकश्चजाताः।ततोयमंकन्यासफलितः ३ ॥५९॥६०॥ एतत्फलमाह। इत्यंकेति। इत्याकारिकायामंकपंक्तौनिष्टंहतिइत्यंकपंक्तिस्त्रीयोमुरवांत्यौमथमे चरमांकौतावेवसंख्यायत्रयोस्तोसर्वगलौसर्वगुरुसर्वलघुभेदौमतौ॥तथाद्यादधोधोभागेयेंकास्तैःसमानास्त्र्यायेषांतेएक

---

दयोगलाः।गुरुलघवोयेषुतेएकादिगलाःएकगुरुःएकलघुःद्विलघुःद्विगुरुःद्विलघुरित्यादयोभेदाःक्रमेणस्युः।एवंचप्रथ मांकसमानसंख्यःसर्वगुरुभेदःद्वितीयांकसमानसंख्याएकगुरुभेदाः।तृतीयांकसमानसंख्याद्विगुरुभेदाः।अत्यांकसमानसंख्यः सर्वलघुभेदः।एवंक्रमेणैवसर्वगुर्वेकलघुद्विलघुसर्वलघुभेदाःज्ञातव्याः।एवमेवचतुरस्रपादजातावेकद्व्यादिगलक्रिया ॥६१॥पंचमप्रत्ययसंख्यामाह।प्रस्ताराणामिति।इहमध्यादिजातेःप्रस्ताराणांयावद्भेदानांगणनंसंख्यास्यात्।अत्रोदाहरणं। उध्यायाउद्दिष्टांकाः ११ एतेषांमेलनेसप्तभवंति। तैश्चैकेनमुक्ताःकृताश्चेदष्टौभवंति।तत्संख्याकामध्यभेदाः।अथवातत्स्थाए

अथसंख्यामस्ताराणांयावद्भेदानांगणनमिहतुसंख्यासौ॥सैकोद्दिष्टांकैश्चेद्गलक्रियांकौचमिश्रणेयास्यात्॥६२॥अथवा॥प्रस्ताराणांभेदसंख्येरचनेयेतेषामंतस्थापिभेदेशभागाः॥द्विघ्नेइष्टेनैतत्संख्यामिता स्तेध्यायंस्यालेकांगुलोवायथेष्टं॥६३॥इत्यंकपंक्तिस्थमुरवांत्यसंख्योभेदौमतौसर्वगलौतथाद्यात्॥अंका दधोधोंकसमानसंख्याभेदास्करेकादिगलाःक्रमेण॥६१॥ ॥ ॥ ॥

वगलक्रियांकाः ५ एतेषांमेलनेष्टौभवंति।तत्संख्याकामध्यभेदाः।एवंजात्यंतरेपिज्ञेयं॥६२॥अथषष्ठप्रत्ययमध्यानमा ह॥प्रस्ताराणांभेदेति।प्रस्ताराणांभेदसंख्येरचनेयेदेशभागाः।तेषांलेरवनदेशभागानांअंतःमध्येपियेदेशभागास्तेद्विघ्नाद्वा भ्यांगुणिता।इष्टूना।एकेनरहितायाएतेषांप्रस्तारभेदानांसंख्यातयामिताःगणिताःस्विकार्याः।तएवाध्वपदवाच्याःयथा नेकग्रहाणांग्रामइतिसंज्ञातथानेकदेशानामध्येतिसंज्ञाज्ञेया।तेदेशभागाःएकांगुलाःअंगुलिपरिमिताःयथेष्टंवाअंगुलि परिमाणरहितावास्युः।एकांगुलाइत्यत्रप्रमाणेविहितस्यमात्रचःप्रमाणेलोद्विगोर्निंयमित्यनेनलुकितपुरुषस्यांगुलेरि त्यनेनसमासांतोचइत्यत्रप्रमाणेविहितस्यमात्रचःप्रमाणेलोद्विगोर्नियमित्यनेनलुकितपुरुषस्यांगुलेरित्यनेनसमासां

तोच्चमत्ययः।अत्रोद्दाहरणंमध्यायाःप्रस्ताराणामष्टकंभवति।तद्दाभ्यांगुणितमेकेनहीनंलक्षतंचेसंचदशभवंतीतिपंचदशां
गुलोमध्यमप्रस्तारलेखनाधारदेशःयथा।प्रथमप्रस्तारभेदमंगुलिपरिमितदेशेलिखित्वातदधएकांगुलदेशंत्यक्त्वाद्विती
यंप्रस्तारभेदंलिखेत्।ततस्तदधनेकांगुलदेशंत्यक्त्वातृतीयेप्रस्तारभेदंलिखेत्।एवंलिखितप्रस्तारभेदलेखनेष्टांगुलदेशा
तदंतरालेसप्तांगुलदेशोभवति।अत्रभेदलेखनेंगुलिप्रदेशकथनमुपलक्षणं॥यावन्मेलेखनेदेशस्तावंतंमेचतदधोदेशं
त्यक्त्वालिखेत्।इतिभावः।अतएवमूलेवायथेष्टमित्यक्तं॥अंतरालेंगुलित्यागस्तुमुन्यक्तानुसारात्॥६३॥ ॥इतिवर्णानां
प्रस्तारादित्यःषट्प्रत्ययाः॥ ॥अथभंग्यंतरेणगलक्रियांनिरूपयितुंवर्णमेरुमाह।द्वित्रेति। द्वित्र्याद्यानिजगराणिकोष्ठा
निभजंतीताःद्वित्र्याद्यागारभाजःअक्षरनिबहमिताःअस्याःजात्याःगलक्रियासंख्याचज्ञातुमिष्टातद्वर्णसमुदायपरिमि
ताःतिर्यक्कूष्मालीपंक्तिःअधोधोलिखेत्।दक्षेस्वदक्षिणभागेअंतगेअंत्येवामेस्वनामभागेआद्दिगेआद्येचउद्ववसितौघेकोष्ट
समुदायेएकंएकंलिखेत्।मेरोर्बाह्यत्वेदक्षिणेभागेसंख्याःमकटयितुंआलिषुपंक्तिषुस्थितानामंकानामैक्यंमेलनंलिखेत्।अंकान्
मेलयित्वाबहिर्लिखेदित्यर्थः।अथमेरोर्बाह्येवामभागेजातीःउक्ताद्याःमकटयितुंएकादीन्एकद्वित्र्यादीनंकान्लिखेत्।यस्य
कोष्ठस्यपूर्तिःअंकलेखनेनपूर्तिरिष्टाअस्मिन्तस्मिन्कोष्टेतदुपरिगंतःकोष्ठोपरिविद्यमानंयद्वृहद्दंकोष्ठद्वयंतद्गता
मंकानामैक्यंलिखेत्।अस्योदाहरणंमूलेलिखितं।तच्चगाय्यामेकगुरुभेदाःकतिद्विगुरुभेदाःकतीत्यादिप्रश्नेज्ञेयं॥तत्रप्र
थमाद्विकोष्ठाद्वितीयात्रिकोष्ठात्तृतीयाच्चतुःकोष्ठेत्याद्यस्तिर्यक्पंक्तयोगाय्याःषडक्षरपादजातित्वात्षट्लिखिताः।ततःस्व
स्वदक्षिणभागस्थांत्यकोष्ठेषुस्वस्वामभागस्थांकेष्वेकैकांकालिखिताः।तत्राद्यपंक्तिस्थकोष्ठद्वयेमेकांद्वयेनैवपूर्णं॥द्वितीय
पंक्तीमध्यस्तकोष्ठेकिमपिनास्तीतिनतत्पूरणमिष्टं।तत्रतत्कोष्ठोपरिगतप्रथमपंक्तिगतकोष्ठद्वयस्थांकयोर्मिश्रणेनत्रांकोज्ञा

ज्ञातःसएवलिखितः।ततस्तृतीयपंक्तौद्वितीयंतृतीयंचकोष्ठंपूरयितव्यं।तत्रद्वितीयेकोष्ठेतदुपरिगकोष्ठद्वयस्थोयोएकत्रांको
तावेवमिश्रयित्वात्रयंकोलिखितः।एवंचतुर्थादिपंक्तावपिशून्यगृहेषुपरिस्थितांकद्वयंमेलयित्वालिखितं।ततोमेरोर्बहिःस्वदक्षिण
भागेप्रथमपंक्तिस्थांकमेरेकेछतेत्रांकोज्ञातःसलिखितः।एवंचतुर्थादिपंक्तावपिशून्यगृहेषुपरिस्थितांकद्वयंमेलयित्वातदधोभा
गेद्वितीयपंक्तिस्थानामंकानामैक्येछतेचतुरंकोज्ञातःसलिखितः।एवंतृतीयादिपंक्तिस्थांकानांमेलनंतत्पंक्तिबहिर्भागेलि
खितं।मेरोबहिःस्वनामभागेपतितपंक्तिएकद्व्यर्थकालिखिताः॥६४॥अस्यवर्णमेरोरिमंसंज्ञांफलंचाह।गलक्रियाइति।अयंव
र्णमेरुरुक्तादिज्ञानांगलक्रियायाःसंख्यायाश्चबोधकइतिपिंगलनागाद्यैर्बुधैःकीर्तितःकथितः।आदृतोवा।एवंचगा

अथवर्णमेरुः॥ द्वित्र्याद्यागारभाजोक्षरनिबहमितास्तिर्यगालिस्वधोधोदक्षेवामेंतगेचाद्दिगउद्ववसि
तौघेलिखेदेकमेकं॥बाह्येसंख्याश्चजातीमकटयितुमथालिस्थितांकैक्यमेकादींश्चेष्टायत्रपूर्तिस्तदु
परिगगृहद्वंद्वगांकैक्यमस्मिन्॥६४॥गलक्रियासंख्यायाश्चापिबोधकइत्ययं॥वर्णमेरुःपिंगलाहीश्व
राद्यैःकीर्तितोबुधैः॥६५॥अथवर्णमर्कटी॥ ॥पिंगलनागप्रमुखाचार्यैःकथितोनुवर्णवृत्तानां॥जाति
विभेदकलार्णलगुरुपिशुनांबोधिकांमर्कटींवच्मि॥६६॥ ॥ ॥ ॥

यत्रीप्रस्तारेसर्वगुरुभेदएकःएवगुरुभेदाःषट्।द्विगुरुभेदाःपंचदश॥त्रिगुरुभेदाःविंशतिः।चतुर्गुरुभेदाःपंचदश।
पंचगुरुभेदाःषट्।सर्वलघुभेदएकः।एवंक्रमेणैकाद्यादिभेदाअपिज्ञातव्याःएतत्पंक्तेर्बहिर्दक्षिणभागेचतुःषष्टिरूपो
कवर्तते।तत्संख्याकाएतत्प्रस्तारभेदाः।एतत्पंक्तेर्बहिर्वामभागेषड्रूपोंकोवर्तते।तेनषष्ठीमायत्रीजातिरितिफलितं।
एवमुक्तादावपिज्ञेयं॥६५॥अथयोजनकथनपूर्वकंवर्णमर्कटींमतिजानीतेपिंगलनागेति।वर्णवृत्तानांजातयश्चविभे

द्वाभेदाश्चकलाःमात्राश्चवर्णाश्चलाःलघवश्चगुरवश्चेत्येतेषांपिंडनांबोधिकांमर्कटींवक्ष्ये॥६६॥ अथत्रिभिस्तत्कृतिमाह। यथेष्टेति।यथेष्टंसमसंख्यकाःयआलयाःकोष्ठानितैर्युताःयुक्ताःषट्अवलीःपंक्तिःतिर्यक्कृत्वातथालिखेत्। अथतासामावलीनांआदिमेषुउदग्वसितेषुगृहेषुजात्यादयश्चतेषट्श्चजात्यादिषट्तान्जातिभेदमात्रावर्णलघुगुरून्लिखेत्। प्रथमपंक्तौसंस्थितेषुगृहेषुकोष्ठेषुवैकादिकान्एकद्व्यादीनांकान्लिखेत्। तथैवतस्याःप्रथमपंक्तेरधस्तनावलेर्द्वितीयपंक्तेर्गृहेषुतुप्रथमगृहेद्वौलिखेत्। ततोद्वितीयादिगृहेष्वस्यस्यपूर्वोयोंकस्तद्गुणान्अंकान्लिखेत्। अथोअनंतरंआद्यद्वितीयथेष्टसमसंख्यकालयश्चतास्तुतिर्यक्षडावलीरधस्तनदादिमोदवसितेषुजात्यादिषट्॥लिखेत्प्रथमपंक्तिसंस्थितगृहेषुचैकादिकांतथैवतद्धस्तनावलिगृहेषुतुद्वौततः॥६७॥ अंकान्स्वपूर्वद्विगुणान्लिखेदथोतुरीयपंक्तिस्थगृहाणिपूरयेत्। आद्यद्वितीयाद्विगतस्वमूर्धगांकयुग्महत्यातद्धस्थलेरवयो॥६८॥ गृहेषुतुर्योलिगतस्वमूर्धगांकार्धंतृतीयालिगमंदिरेषुतु॥स्वाधस्थितालिद्वितयस्थितस्वाधःसंस्थितांकद्वितयैक्यमालिखेत्॥६९॥ इतिवर्णवृत्तमर्कटी॥ ॥ ॥ ॥ ॥



यालिगतायोःप्रथमद्वितीयपंक्तिस्थयोःस्वमूर्धगांकयोःस्वोपरिस्थांकयोर्युग्मस्यहत्यागुणनेनतुरीयपंक्तिस्थगृहाणिचतुर्थपंक्तिगतस्यस्वमूर्धगांकस्यस्वोपरिस्थांकस्यार्धंलिखेत्। ततःतृतीयालिगमंदिरेषुतृतीयपंक्तिगगृहेषुतुस्वस्याःतृतीयपंक्तेरधस्थितयोरात्योश्चतुर्थपंचमपंक्त्योर्द्वितीयेयुग्मेस्थितंयत्स्वस्वपूरणायकोष्ठस्याधःस्थितमंकद्वितीयंतस्यैक्यंमेलनंलिखेत्।अस्योदाहरणंतुमूलएवलिखितं। तत्रोक्तायनुष्टुबंतजातीनांमध्येकाजातिःकथिताकस्याःकतिभेदाःकस्याःकतिमात्राःकस्याःकतिवर्णाश्चेत्यादिप्रश्नेदृष्टव्यं।तत्रनवनवकोष्ठकाःषट्पंक्तयस्तिर्यक्कृताः।तासांपंक्तीनामाद्यगृहेषु

जातिभेदमात्रादयःषट्उर्ध्वाधरभावेनलिखिताःततःप्रथमपंक्तिस्थगृहेष्वेकाद्यष्टावंकालिखिताः।द्वितीयपंक्तिस्थगृहाणांमध्येप्रथमगृहेद्वौलिखितौ।ततोद्वितीयगृहेपूर्वद्विगुणाश्चत्वारस्तृतीयगृहेतद्द्विगुणाअष्टाद्यादिपूर्वपूर्वद्विगुणालिखिताः।ततश्चतुर्थपंक्तिगृहेषुपूरणायगृहोपरिगतयोःप्रथमद्वितीयपंक्तिस्थांकयोर्गुणनेनयोंकोलब्धःसलिखिताः।तत्रद्वाभ्यामेकोगुणितश्चेद्द्वौजातौतावेवप्रथमगृहेलिखितौ॥चतुर्भिर्द्वौगुणितौचेदष्टौभवंति।तएवद्वितीयगृहेलिखिताः।एवंतृतीयादिगृहांकेज्ञेयं।ततःपंचम्याःषष्ठ्यपंक्तेर्गृहेषुचतुर्थपंक्तिस्थांकार्धंलिखितं।तत्रद्वयोरर्धमेकः।सएवप्रथमगृहेलिखिताः।अष्टानामर्धेचतुरंकःसएवद्वितीयगृहेलिखितः।एवंतृतीयगृहादावपिज्ञेयं।ततस्तृतीयपंक्तिस्थगृहेषुचतुर्थपंक्तिपंचपंक्तिस्थांकयोर्मेलनंकृत्वालिखितं॥तत्रद्वेकयोर्मेलनेत्रयंकोजातःसएवप्रथमगृहेलिखितः।अष्टचतुरंकयोर्मेलनेद्वादशांकोजातःसएवद्वितीयगृहेलिखितः।एवंतृतीयादिगृहेषुज्ञेयं।एवंचप्रथमाद्यउक्तोजातेर्द्वौभेदातस्याएवयावद्भेदेषुमात्रास्तिस्रः।वर्णोद्वौ।लघुरेकः।गुरुरेकः।तथाद्वितीयायाअप्येकोजातेश्चत्वारोभेदाः॥तस्याएवयावद्भेदेषुमात्राद्वादश।वर्णाअष्टौ।लघवश्चत्वारः।गुरवश्चत्वारः।एवंमध्यादिजातेरपिभेदादिसंख्याज्ञेयाः॥६७॥६८॥६९॥ इतिवर्णमर्कटी॥अथमात्रास्तारंद्वाभ्यामाह।कलाछंदसामिति।ज्ञोबुधःकलाछंदसांमात्रावृत्तानांप्रस्तौनांछितायांसत्यांतस्यवृत्तस्यकलामात्राःसमाःस्फुटेनहिंतिरश्चामाद्यावल्यांप्रथमपंक्तौद्वयोर्मात्रयोरेकोगुरुरितिप्रकारेणकेवलान्गान्गुरून्लिखेत्। वृत्तस्यकलाअसमाश्चेन्नहिपूर्वान्गान्गुरूनलिखेत्।अथाधःसंस्थितासुद्वितीयाद्यालिषुआद्याद्वाद्वुरोरधोलंलघुलिखेत्। तस्यपुरतोयेचोपरिवत्उपरिस्थवत्आलिखेत्।यथोपरिगुरवलघवश्चसंतितथैवाधोलिखितव्याः।यद्यपिपूर्वोधरावाणामसिपुरश्चैषामित्यनेनासिप्रत्ययएवपुराद्देशविधानात्पुरइतिवक्तुंयुक्तंतथापिस्यात्पुरःपुरतोग्रतइत्यमरकोशात्।

आत्मीयंचरणंदृधातिपुरतइत्यादिकविभयोश्चपुरतइतिभयुक्तं। ऊर्ध्वप्रस्तारभेदापेक्षयाएकाकलान्यूनाचैनहिंअस्यअधो पंक्तौलिखितस्यपृष्ठतःपृष्ठभागेलंलघुंपरिलिखितु। यदाउभेदेतेकलेऊनेन्यूनेस्तस्तदागुंगुरुंलिखतु। बह्वोनुनास्ताकलाः समायदितर्हिज्ञोबुधःरत्नमात्राभरणपरिमितान्गुरूनलिखतु। ऊनाःबह्व्यःकलाअसमाःस्युश्चेनहिलादीन्लघुपूर्वान्गानगुरून्लिखतु। अत्रापिरत्नमात्राभरणपरिमितानितिविशेषणंज्ञेयं। इदंकिमवधिकर्तव्यमित्यपेक्षयामाह।सर्वेपि। यावत्सर्वलाली॰सर्वेलघुपंक्तिर्भवेत्।तावत्पर्यंतंलिखेदित्यर्थः॥समकलरत्नासमकलरत्नयोःप्रस्ता

अथमात्राप्रस्तारादि॥तत्रमात्राप्रस्तारः॥ ॥कलाछंदसांप्रस्तौवांछितायांकलाश्चेत्समास्तिर्यगाद्या
बलौगात्॥लिखेत्केवलान्ज्ञोसमाश्चेत्कलागान्लघूर्वानथालिख्यधः संस्थितास्तु॥७०॥लंगादाद्यादध
स्तात्पुरतउपरिबद्यालिखेत्पृष्ठतोस्यन्यूनैकाचेत्कलालंपरिलिखतुयदीनेउभेनेतदागं॥बह्वोन्यूनाः
समास्तायदिलिखतुगुरून्ज्ञोसमाश्चेत्स्युरूनागान्लादीन्रत्नमात्राभरणपरिमितान्सर्वलालीस्तुयाव

रोदाहरणेमूलएवहरणेलिखेत्।तत्रचतुष्कलानांसमत्वात्द्वौगुरूतिर्यक्लिखितौ।तत्राद्यगुरोरधोभागेलघुर्लिखितः।द्वितीयपुरोरधस्तगुरुरेवलिखितः॥तत्पुरतउपरिवद्दित्युक्तेः।एवंचद्वितीयपंक्तौतिस्रः।कलाजाताः।ऊर्ध्वपंक्त्यपेक्षया।एकाकलान्यूनेतिकृत्वाष्टमभागेलघुर्लिखितः॥तृतीयपंक्तौतुद्वितीयपंक्तिस्थगुरोरधोलघुर्लिखितः।तस्यपुरःउपरिकिमपिनास्तीत्यधोपिकिमपिनलिखितं।एवंचोर्ध्वपंक्त्यपेक्षयास्तिस्रोमात्रान्यूनाः।ताभ्यासमाइतिकृत्वालिखितलघोःपृष्ठतोलघुपूर्वोगुरुर्लिखिताः॥एवंचतुर्थपंक्त्यादौज्ञेयंविषमकलाप्रस्तारेतुपंचकलानांविषमत्वात्लघुपूर्वोगुरुलिखितौ।द्वितीयपंक्तावुपरिस्थगुरोरधोलघुर्लिखितः।तस्यपुरउपरिस्थवद्गुरुर्लिखितः।एवंचोर्ध्वपंक्त्यपेक्षयाद्वैकलेन्यूनेइतिपृष्ठतएकोगुरुर्लिखितः॥एवंहती

यपंक्त्याद्यापिज्ञेयं॥७०॥७१॥अथवर्णप्रस्तारकृतिमात्राप्रस्तारकृत्योःप्रायेणसाम्यात्प्रसंगाद्वर्णप्रस्तारकृतिंनिरूपयति। वर्णेतिए
वंमात्राप्रस्तारकृतिवत्वर्णप्रस्तारःवर्णप्रस्तारकृतिर्ज्ञेयोनिशेषःपरंतुअत्रऊनस्थानेनगानेवगुरूनेवआलिखेत्।नतुलघुपूर्वानपि।
अत्रोद्दाहरणं॥११॥अत्रात्युक्तायाःसर्वेगुरुपादःप्रथमंलिखितः।द्वितीयपंक्त्याद्यगुरोरधोलघुर्लिखितः।तत्पुरःउपरिवद्दित्यकेगु
रुलिखितः।तृतीयपंक्तौद्वितीयपंक्तिस्थगुरोरधोलघुर्लिखितः। चतुर्थपंक्त्याद्याद्गुरोरधोलघुर्लिखितः।तत्पुरउपरिस्थवल्ल
घुर्लिखितः।इयमेवपंक्तिःसर्वेलघुर्जातेतिपंचमपंक्तिर्नलिखिता।एवंव्यस्तादिप्रस्तारेज्ञेयं।येचैपरीत्यभेदैःप्रस्ताराणांदश

वर्णप्रस्तारोपिचैवंपरंतुनेगानेवात्रालिखेदेवदशस्कः॥प्रस्ताराणांचैपरीत्यादिभेदैर्न्यासास्तेषांद्वौमयोक्तौ
स्फुटाहौ॥७२॥अथमात्रानष्टं॥मात्रानष्टेदृष्टरत्नस्यमात्राएवलिख्याद्यद्विमात्रोर्ध्वमेकं॥द्वानन्यासांस्वस्व
पूर्वांकयुग्मेकंचालिख्योर्ध्वंततोत्रांकमध्ये॥७३॥विचारितांकंपरिलोप्यसंभवानुरोधतश्चांतिमपृष्ठगां
कं॥यद्भंगोसौपरमात्रयामात्रागुरुस्यादिसरायसास्थिताः॥७४॥ ॥ ॥ ॥

न्यासानरत्नस्यमध्यादावक्तास्तेषांमध्येमयास्फुटाहौस्फुलभौद्वौभेदौउक्तौ।एकोवर्णप्रस्तारावसरेउपगेमात्राप्रस्तारावसरेचो
क्तइतिज्ञेयं॥७२॥अथमात्रानष्टंद्वाभ्यामाह।मात्रानष्टइति। मात्रानष्टेकर्तव्येसति।अमुकसंख्याकंरसंकीदृशमितिदृष्ट
स्यरत्नस्यमात्राःकलाएवालिख्यालिखित्वा।तत्राद्ययोर्द्वयोर्मात्रयोःऊर्ध्वंएकंद्वौचकमात्आलिख्य। द्विमात्रोर्ध्वमित्यत्र
द्विमितेमात्रेद्विमात्रेइतिमध्यपदलोपीसमासः। दिक्संख्येसंज्ञायामितिसमाधिकरणतत्पुरुषविनयमात्। अन्यासांमात्रा
णामूर्ध्वंस्वस्वाःस्वस्वाःमात्रायाःपूर्वेयेमात्रेतत्संबंधियदेकयुग्मंतस्यैक्यंचालिख्यतत्तांकमध्येविचारितांकेदृष्टांकं
परिलोप्यन्यूनिकृत्यशेषांकेसंभवानुरोधतांकंपरिलोपयेत्। असौशेषांकेलुप्यमानांकःमस्यामात्रायाऊर्ध्वगःऊर्ध्वे

भागे विद्यमानः सामात्रापरयामात्रयासाकं गुरुस्यात्। इतःयथासंभवंअंतिमस्यांकस्यपृष्टगांकंपृष्टगतराःशेषांकेअलुप्यमानांकाःमात्रास्तथायथावत्पूर्वरूपेणैवेतियावत्। स्थिताभवंति।अत्रोदाहरणं। चतुष्कलाप्रस्तारेतृतीयंरूपंकीदृशमितिप्रश्नेवृत्तस्यचतस्रोमात्रास्तिर्यक्स्थाप्याःयथा॥तत्रप्रथमद्वितीययोर्मात्रयोरुपरिकमादेकौद्वौचलेख्यौ।ततस्तृतीयमात्रोपरितत्पूर्वमात्राद्वयोपरिस्थयोर्द्वयोरंकयोरंकयोर्मेलनेनत्र्यंकोभवतिसलेख्यः। यथा॥ १२३ अत्रपृष्टांकस्त्र्यंकःतमंकंभंक्त्वेपंचांकेलोपयेत्॥एवंचपंचसूत्रयोगताभेदावशिष्टौ।तस्मिन्द्व्यंकेतत्पूर्वस्त्र्यंकोनलुप्यते। लोप्यस्त्र्यंकस्याधिकत्वात्। तत्पूर्वोद्वितीयमात्रास्थोद्व्यंकस्तुलुप्यतएवद्वयोरंकयोःसमत्वात्। अत्यांकस्थानेकिंकिमपिनावशिष्टमितिप्रथममात्रोपरिस्थएकांकःस्वरूपेणैवावस्थितः।एवंचद्वितीयमात्रोपरिस्थांकोत्यांकेलुप्तइतिद्वितीयतृतीयमात्रयोःस्थानेएकोगुरुर्लेख्यः॥यथा॥तथाचचतुष्कलाप्रस्तारस्यतृतीयोभेदोमध्यगुरुर्भवतीत्यवगंतव्यं॥एवंपंचकलादीनांद्वितीयादिभेदप्रश्नेपिद्रष्टव्यं॥७३॥७४॥ अथमात्रोद्दिष्टंद्वाभ्यामाह।मात्रोद्दिष्टमिति। मात्रोद्दिष्टंवदत्रेतिद्वितीयेनसंबंधः।इदंकतिथमितिपृष्टस्यवृत्तस्यवर्णान्विलिख्यतत्राद्ययोःप्रथमाद्वितीययोर्मात्रयोरूर्ध्वमेकंद्वौकमात्विलिखेत्। अन्यासांमात्राणांऊर्ध्वंतुस्वस्वस्यादिमंयदेकद्व्यंतंसैकंमेलनंलिखेत्।आस्कमात्रास्कगःगुरुःस्याच्चेत्तदातर्हितस्यगुरोर्मूर्ध्निउपरिभागेत्यन्यस्यायाःतद्गुरुगतायाःआदिकलायाःप्रथममात्रायाःसंबंधिनमंकंलिखेत्। तस्यगुरोरधोभागेतद्गतायाद्वितीयस्याःकलायाअंकंलिखेत्। चरमांकेगोर्ध्वांकान्गुरूपरिस्थांकान्विलोप्यन्यूनीकृत्यशेषांकेनमात्रोद्दिष्टंवदतु।अत्रोदाहरणं।चतुष्कलाप्रस्तारेमध्यगुरुभेदःकतिथइतिपृष्टेवृत्तवर्णान्विलिखेत्।यथा॥।ततःप्रथमाद्वितीययोर्मात्रयोरुपरिएकांकंद्व्यंकंचलिखेत्। तृतीयमात्रोपरितत्पूर्वयोरेकद्व्यंकयोर्मेलनेत्र्यंकोभवति। सलेख्येनैवप्राप्तःपरंतुद्वितीयत-

---

तीयमात्रयोःस्थानेगुरुरस्तीतिद्वितीयमात्रायाःद्व्यंकमुपरिलिखेत्। तृतीयमात्रायास्त्र्यंकंतुअधोलिखेत्।अधस्तद्गतेतरकलायाइत्यक्तत्वात्।ततश्चतुर्थमात्रोपरितत्पूर्वयोस्त्र्यंकद्व्यंकयोर्मेलनेपंचांकोभवतितंलिखेत्।यथा॥१२३ तत्रचरमेपंचांकेगुरोरूर्ध्वभागस्थंद्व्यंकंन्यूनीकृत्यावशिष्टस्त्र्यंकोभवति।एवंचचतुष्कलाप्रस्तारेमध्यगुरुभेदस्तृतीय॥ इतिफलति।एवंपंचकलादिनांभेदांतरेपिज्ञेयं॥७५॥७६॥ ॥अथमात्रामस्ताराणांलघुगुरुसंख्याज्ञापकंमेरुनवमिराह।यन्मात्रेति।बुधैर्यस्यमात्रावृत्तस्यगलक्रियागुरुलघुज्ञापिकाक्रियाइप्सिताद्दष्टातस्यवृत्तस्यकलाभ्यःसकाशात्एकयासंख्ययाऊनाअपिकावाअल्पःपंक्तयस्तिर्यक्प्रथातथाविलेखनीयः।आस्कपंक्तिषुकोष्ठयुगेनान्तिंयुक्तंपंक्तयोर्द्वयंविलेखनीयं।ततोबुधःतस्यपंक्तिद्वयस्याधःव्याधिभिःकोष्ठैराकलितंयुक्तं।पंक्त्योर्युगंयुगंनस्यःस्थापयित्वालिखेत्यर्थः।स्वस्यदक्षेदक्षिणभागेयानिअंतिमकोष्ठानितेषूर्ध्वाधरत्वेनऊर्ध्वाधरभावेनएकंएकंअंकंविलिख्यवामेवामभागेयानिआद्यानिप्रथमानिकोष्ठानितेषुप्रत्येकंएकांकयोर्बलग्नगान्मध्यगान्द्व्यादीनंकान्कमात्विलिख्यततोयस्यगृहस्यपूर्तिःअंकेनपूरणंईप्सितादृष्टातस्यगृहस्ययाआलिःपंक्तितस्याःगेहैःकोष्ठैःसहनसमानानिगेहानिकोष्ठानियस्याःसाऊर्ध्वपंक्तिरस्तिचेत्तर्हिपरिपूर्यमाणस्यगृहस्यशिरस्कंउपरिस्थंवामंवामभागस्थकोष्ठगतंतस्यशिरस्थवावामभागकोष्ठस्यऊर्ध्वेदक्षेदक्षिणभागेगतंचांकंविमिश्यएकीकृत्यात्रपूर्यमाणांककोष्ठेनिवेशयेत्लिखेदित्यर्थः।यदापूर्यमाणकोष्ठपंक्तिगृहैःसमानासंख्यायेषांतानिगृहाणियस्यांसाऊर्ध्वपंक्तिस्तदाआपूर्यमाणाद्गृहादुपरिस्थंतयैवतस्योपरिस्थांकस्यमूर्धगदक्षिणंउपरिविद्यमानदक्षिणभागस्थंचांकंसंमिश्यएकीकृत्यतत्रपूर्यमाणगृहेलिखतु।अधोऽंकन्यासस्यफलमाह।स्वदक्षादिति।स्वस्यदक्षात्।दक्षिणभागात्वामभागपर्यंतंसमास्कद्विचतुरादिषुपंक्तिषुआखिलगंविनासर्वगुरुभेदंविनाप्रतिवेश्मकोष्टेकोष्टेसर्वेलालघवोयस्मि

न्सर्वलघुःएकद्याद्योगुरवोयेषुतेषुएकद्यादिगुरवःसचतेचसर्वलैकद्यादिगुरवस्तान्भेदान्क्रमात्विद्यात्।विष
मासक्एकत्र्यादिषुपंक्तिषुनक्कान्आखिलगुरुभेदसुक्तान्सर्वलैकद्यादिगुरुभेदान्विद्यात्।स्वस्यवामात्।वामभागात्
दक्षिणभागपर्यंतंविषमासक्पंक्तिषुसर्वेगागुरवोयस्मिन्सर्वगःद्विमद्भृतयोद्यादयःसमाःद्विचतुराद्योलघवोयेषुतेद्वि-
भृतिलघवःसचतेसर्वगद्विमद्भृतिसमलघवस्तान्सर्वलःसर्वलघुभेदोंतिमोयेषांतान्भेदान्विद्यात्।अथमेरोर्बहिरंकन्या

गलक्रियासंख्ये॥यन्मानाद्यत्रगलक्रियेप्सितातत्कलाभ्यएकोनाः॥अधिवाऽन्यस्मिंयेन्विलेखनीयाबुधैरा
स्क॥७७॥पंक्योर्द्वयंकोष्ठयुगान्वितंततोधरूद्यादिकोष्ठाकलितंयुगंयुगं॥न्यस्यस्वदृक्संतिमकोष्ठकेषुतूर्ध्वा
धरत्वेनहिचैकमेकं॥७८॥वामाद्यकोष्ठेषुविलिख्यचांकान्प्रत्येकमेकांकवलग्नगान्क्रमात्॥द्याद्यास्ततो
यद्गृहपूर्तिरिष्टासितादृलिगहैरसमानगेहा॥७९॥चेदूर्ध्वपंक्तिःपरिपूर्यमाणशिरस्थवामंद्वदूर्ध्वदृक्संगं॥
अंकंविमिश्र्यानिवेशयेद्धःसमानसंख्याकगृहायतातदा॥८०॥आपूर्यमाणादुपरिस्थमंकंतथैवतन्मू
र्धगदक्षिणंच॥समिश्र्यतत्रालिखतुस्वदृक्साक्रमात्तुभेदान्प्रतिवेशमविद्यात्॥८१॥सर्वलैकद्यादिगुरू
न्समास्वखिलगंविना॥तद्युक्तान्विषमासक्स्ववामात्खिलल्लांतिमान्॥८२॥विषमासक्सर्वगद्विमद्भृति
समलघून्समासक्पंक्तिषुतु॥एकादिविषमलयुतान्निजवामेत्वालितोबहिर्मुखतः॥८३॥द्विकलादिम
स्तारज्ञानार्थंक्रमोत्तराधरत्वेन॥द्यादीन्लिखेत्स्वदृक्षेतुबहिःपंक्तिगृहस्थितांकैक्यं॥८४॥संख्याज्ञानार्थे
मतिपंक्तयथवोद्दिष्टवक्रमाद्यादीन्॥विलिखेद्विशेषकलामेरुस्त्वध्यातुपूर्ववज्ज्ञेयः॥८५॥ ॥

समकारमाह।निजवामेइति।निजवामेभागेआलितोपंक्तेर्बहिर्मुखतःमारंभेद्विकलादीनांमस्तारस्यज्ञानार्थेऊर्ध्वाधरत्वेन
द्यादीनंकान्लिखेत्।स्वदृक्षेतुपंक्तेर्बहिर्भागेसंख्यानांमस्तारसंख्यानांज्ञानार्थेमतिपंक्तिपंक्तीपंक्तिगानियानिगृहाणितत्र

स्थितायेंकास्तेषामैक्यंएकीकरणंलिखेत्।अथवासंख्याज्ञानार्थेमेरोर्बहिर्दक्षिणभागेष्टधकूवाउद्दिष्टवत्उद्दिष्टयथांकन्यासउक्त
स्तद्वत्क्रमात्द्यादीनंकान्विलिखेत्।उपसंहरति।इतीति।इतिउक्तप्रकारेणएषकलामेरुर्भवति।अभ्यानंनिरूपयति।अभ्येति।
अत्रकलामस्तारेअभ्यातुपूर्ववत्वर्णमस्तारवत्क्षेयः॥मेरोरुदाहरणंतुमूलएवलिखितं॥तत्रसप्तकलामस्तारेसर्वलघुभेदाः।
कतिएकगुरुभेदाःकतिद्विगुभेदाःकतीत्यादिप्रश्नेसप्तकलामस्तारस्यभेदाः।कतीतिप्रश्नेचसतिप्रश्नीयकलाद्दत्तावधितद्धिकावा
पंक्तयोलेख्याइत्युक्तत्वात्अत्रौपंक्तयोलिखिताः।तत्रप्रथमंपंक्तिद्वयंद्विकोष्ठकमस्ति।ततोधस्त्रिकोष्ठकंपंक्तिद्वयं।ततोधश्चतुःको
ष्ठकंपंक्तिद्वयं॥एवमुत्तरत्रपंक्तयोर्द्वयंद्वयंज्ञेयं।तत्रस्वदक्षिणभागंत्यकोष्ठेषुएकांकाऊर्ध्वाधरभावेनलिखिताः।स्ववामभागाद्य
कोष्ठेषुकएकःद्वौएकस्त्रयएकइत्यादयःएकांकमध्यगताःद्विआद्योंकालिखिताः।एवमंकन्यासेनप्रथमपंक्तिःद्वयकोष्ठानांपूर्ति
र्जातैव।अथकनायत्तीयपंक्तिस्त्रिमध्यगृहंपुरयितुमिष्टंतद्पेक्षयाऊर्ध्वंतद्पंक्तिर्द्विकोष्ठात्मकत्वात्समानगेहा।अतःपुरणाय
गृहौपरिगतवामभागस्थकोष्ठगतंद्व्यंकंतदुपरितनायांप्रथमपंक्तौदक्षिणभागस्थंएकांकंचमिश्रयित्वाज्ञातस्त्र्यंकःसपूरणा
यत्तृतीयपंक्तिमध्यगृहेलिखितः।ततःश्चतुर्थपंक्तिस्त्रिमध्यगृहंपूरयंतद्ऊर्ध्वोत्तृतीयापंक्तिःअनयासमानगेहास्तीतिपूरणीयगृहो
परिस्थंत्र्यंकंतदुपरितनायांद्वितीयपंक्तौदक्षिणभागस्थंएकांकंचमिश्रयित्वाज्ञातश्चतुरंकःसतस्मिन्पूरणीयेचतुर्थपं
क्तिस्थगृहमध्येलिखितः।एवंपंचमपंक्त्यादौपूरणीयगृहपूर्तिर्ज्ञेया।मेरोर्बहिर्दक्षिणभागेप्रतिपंक्तिपंक्तिस्थांकैक्यंलिखि
तं।यथाप्रथमपंक्तौएकांकद्वयंवर्ततेतयोर्मेलनेनजातोद्व्यंकःसलिखितः।द्वितीयपंक्तौद्वयेकयोरंकयोर्मेलनेनजातस्त्र्यंकः
सलिखितः।एवमुत्तरत्रज्ञेयं।वामभागेतुमेरोर्बहिःप्रतिपंक्तिद्वौत्रयश्चत्वारइत्यादयःक्रमाल्लिखिताः।एवमंकन्यासेफ
लितेयस्याःपङ्क्तेर्बहिर्वामभागेयोंकोल्लितसंख्याककलानांप्रस्ताराणांएकगुर्वादिभेदाज्ञेयाः।दक्षिणभागेपंक्तेर्बहिर्योंको

स्तितसंख्याकाप्रस्तारा भेदाज्ञेयाः। तथैदक्षिणभागाद्वामभागपर्यंतंक्रमात्सर्वलघ्वेकगुर्वादिभेदाज्ञेयाः। एवंचसप्तकला प्रस्तारेषुएकः सर्वलघुर्भेदः। एकगुरुश्चषट्। द्विगुरवोदश। त्रिगुरवश्चत्वारः। अस्याःपंक्तेःसमत्वात्सर्वगुरुभेदोत्रनास्ति॥ एतत्कलाप्रस्ताराणामेकविंशतिभेदाः। संतीतिज्ञेयं। तथाषट्कलाप्रस्तारेषु। एकःसर्वलघुभेदाः। षट्द्विगुरवोभेदाः षट्द्विगुरवोभेदाः। एकःसर्वगुरुभेदः। एतत्कलाप्रस्ताराणांत्रयोदशभेदाः। संतीतिज्ञेयं। एवंद्विकलादिप्रस्तारेपितथैवयामभागादक्षिणभागपर्यंतंक्रमात्विषमास्पंक्तिषुसर्वगुरुद्व्यादिसमांकमितलघुभेदाः। सर्वलघुभेदश्चज्ञेयाः। समास्पंक्तिषुक्रमात्। एकाद्विविषमांकमितलघुभेदाः। तथाचषट्कलाप्रस्तारेषुसर्वगुरुरेकोभेदः। द्विलघवःषट्। चतुर्लघवःपंचसर्वलघुरेकोभेदः। तथातत्रकलाप्रस्तारेषुएकलघवःश्चत्वारोभेदाः। त्रिलघवोदश। पंचलघवःषट्। सर्वलघुरेकः। एवंद्विकलाप्रस्ताराश्चापिज्ञेयं॥ अथवोद्दिष्टवदित्यादिनोक्तःसंख्याज्ञानप्रकारोयथा। प्रथममेकंद्वौचानुलिखेत्। ततोग्रेपूर्वपूर्वांकद्वयमेकीकृत्यालि

अथमात्रामर्कटी॥ ॥मात्रामर्कट्यामपिपंक्तिर्लिखवर्णमर्कटिवच्च॥ जातिमभेदलघुगुरुवर्णकला
आदिमंदिरेष्वासां॥९६॥एकादीन्प्रथमावलेर्गृहचयेलंकान्द्वितीयावलेर्मात्रोद्दिष्टवदालिखेत्तत
स्तृतीयावलेः॥स्वाद्यौस्वार्धंगवेश्मषष्टगृहगंचामिश्र्यतुर्यावलेस्तोर्ध्वौलौलिखितान्द्वितीय
गृहतःशून्यंमुखस्थेगृहे॥९७॥हित्वातत्तःपंचमपंक्तिवेश्मस्वस्वोर्ध्वांकद्वयमेलनंतः॥षष्ठालि
गेहेष्वपिचस्वमूर्ध्वांकद्वयैक्यंविलिखेद्विशारदः॥९९॥ ॥ ॥ ॥

खेत्॥१।२।३।५।९।१३।२१। इत्यादि। एवंचद्विकप्रस्तारस्यद्वौभेदौ। त्रिकलाप्रस्तारस्यत्रयः। चतुष्कलाप्रस्तारस्यपंच इत्यादिज्ञेयाः॥७७॥७९॥७९॥८०॥८१॥८२॥८३॥८४॥८५॥ अथमात्राजातिभद्न्नापिकांमर्कटीत्रिभिराह्मात्रा

---

मर्कट्यामिति। हेसुभ्रुवंवर्णमर्कटीवत्मात्रामर्कट्यामपिपंक्तिर्लिखयथावर्णमर्कट्यांयथेष्टंसमकोष्ठकाषट्पंक्तयो लिखितास्तद्वन्मात्रापिलेखेत्यर्थः। जसांपंक्तीनामादिमंदिरेषुप्रथमकोष्ठेषुक्रमाज्ज्ञात्यादीनिषट्पदानिलिखेत्॥९६॥एकेति। ततःप्रथमावलेर्गृहचयेकोष्ठसमुदायेतुएकादीन्अंकान्लिखेत्। द्वितीयावलेर्गृहचयेमात्रोद्दिष्टवदंकान्लिखेत्। यथामात्रोद्दिष्टप्रथमंएकंद्वौचलिखित्वातत्तोग्रेपूर्वपूर्वांकद्वयमेलनंलिखितंतन्नतनापिलेखेदित्यर्थः। ततःस्तृतीयावलेर्गृहचयमध्ये प्रथमकोष्ठद्वयेएकंद्वौचलिखेत्। तृतीयादिगृहेषुतुस्वस्वपूरणीयगृहस्याद्यौपूर्वौअंकौस्वोर्धगवेश्मनःपूरणीयगृहोर्ध्वभागात्कोष्ठस्यषष्टगृहगंषष्टकोष्ठगतमंकंचामिश्र्यएकीकृत्यलिखेत्। तुर्यावलेःचतुर्थपंक्तेर्गृहचयेस्वस्याश्चतुर्थपंक्तेरूर्ध्वौलौतृतीयपंक्तौलिखितानंकान्अंतिममंकंहित्वात्सकाशाच्चतुर्थपंक्तेर्द्वितीयगृहतःसकाशात्लिखेत्। तस्याएवमुखस्थेप्रथमेगृहेशून्यंलिखेत्। पंचमपंक्तेर्वेश्मसकोष्ठेषुस्वस्यस्वस्यपूरणीयगृहस्ययदूर्ध्वगंउपरिभागस्थंअंकद्वयंतस्यमेलनमेकंलिखेत्। ततोविशारदःछंदःशास्त्रेनिपुणःषष्ठालेगृहेष्वपिचस्वस्यपूरणीयगृहस्ययत्मूर्ध्वगंऊर्ध्वभागस्थंअंकद्वयंतस्यैक्यंलिखेत्। अस्याउदाहरणंतुमूलएवलिखितं। तत्रपंचमकलाप्रस्ताराणांभेदाः। कतिलघवः कतिगुरवः कतीत्यादिप्रश्नेषट्कोष्ठकाःतदधिककोष्ठाभावाषट्पंक्तिर्लिखेदित्यत्रैकैकस्मिन्कोष्ठकाःषट्पंक्तयोलिखिताः। तत्रपंक्तीनां प्रथमकोष्ठेषुजातिभेदलघुगुरुवर्णकलापदानिलिखितानि। प्रथमपंक्तेर्गृहेषुएकद्व्यादयोंकालिखिताः। द्वितीयंक्तेर्गृहेषुप्रथमगृहद्वयेएकद्व्यंकौलिखितौ। ततस्तृतीयगृहेतत्पूर्वौकौएकद्व्यंकौतदुपरिगकोष्ठात्पूर्वंकोष्ठगोद्व्यंकश्चतेषांमेलनेनजातःपंचांकःसलिखितः। चतुर्थकोष्ठेतुतत्पूर्वांकौद्वितदुपरिगगृहात्पूर्वगृहस्थअंकःतेषांमेलनेनजातोदशांकःसलि

तः।एवंपंचमादिगृहेष्वंकलेखनंज्ञेयं।चतुर्थपंक्तेर्द्वितीयादिगृहेषुसोर्ध्वपंक्तिस्थाएकद्विपंचाद्यंकालिखिताः।तृतीय पंक्तिचरमांकएकसप्ततिरूपःसोधोभागेनलिखितः।पूरणीयकोष्ठाभावात्।तस्याएवप्रथमगृहेशून्यंलिखितं।पंचमपंक्तौ प्रथमगृहेचतुर्थीतृतीययोःपंक्त्योराद्यगृहयोरेकएवांकोवर्ततइतिकृत्वासएवलिखितः।ततोद्वितीयगृहेतदूर्ध्वयोरेकद्व्यंकयोर्मेल नेनजातस्त्र्यंकःसलिखितः।तृतीयगृहेतदूर्ध्वयोर्द्विपंचांकयोर्मेलनेनजातःसप्तांकःसलिखितः।एवमुत्तरत्रज्ञेयं।षष्ठपंक्तौप्रथम गृहेचतुर्थीतृतीयोःपंक्त्योराद्यगृहयोरेकएवांकोवर्ततइति।कृत्वासएवलिखितः।पंचमीपंक्त्योराद्यगृहयोरेकएवांकोवर्ततइति कृत्वासएवलिखितः।द्वितीयगृहेतुतदूर्ध्वयोरेकद्व्यंकयोर्मेलनेनजातश्चतुरंकःसलिखितः।एवंतृतीयगृहादावपिस्वोर्ध्वांक द्वयमेलनलेखनंज्ञेयं।एवमंकन्यासेफलितेपंचमकलाप्रस्तारार्णांअष्टौभेदाः।विंशतिर्लघवः।दशगुरवः।त्रिंशद्वर्णाःचत्वारिंशत्क लाइति।एवंककलाप्रस्तारादावपिभेदादिज्ञेयं॥८७॥८८॥मात्रावर्णेति।मात्रावर्णपताकेमात्रापताकाचादीयस्यवर्णयूथादेःयःप्र त्ययचयःमात्रावर्णगलक्रियादिप्रत्ययकसमुदायःसतुरत्नकर्णिप्रभृतिग्रंथेभ्यःसकाशात्ज्ञेयः।अत्रग्रंथेमयासविस्तृति

मात्रावर्णपताकादिर्योन्यःप्रत्ययचयःसेतुज्ञेयः॥रत्नचूडमणिप्रभृतेर्ग्रंथेभ्योनात्रविस्तृतिभियोक्तः॥८९॥अथ

कवेराश्रयकथनं॥ ॥श्रीमान्कौशिकगोत्रजभ्रमशाजित्वाभवान्याबराद्प्रालेयनगाद्भिसागरतटांतंचक वालंभुवः।तथ्येयोयवनाद्विपेषुहरितांराजन्यवंशाग्रणीरासीच्छत्रपतिःस्वयाचकचयस्वर्दुःशियाजिरूपाः॥९०॥

भियाविस्तारभयान्नोक्तः।एवंचाश्रयदुर्गतस्कगमंसंक्षेपतश्चोक्तमितिभावः॥८९॥ ॥इतिमस्तारादिषट्प्रत्ययः॥ अथकवि राश्रयभूतराजवंशंसप्तभिराह॥श्रीमानितिं।अत्रयत्पदानांसतुकोंकणेतितृतीयस्थतत्पदेनसंबंधः।योभवान्याबराद्प्रालेयेनगात्हिमाचलाद्आरभ्यभिसागराणांपूर्वपश्चिमदक्षिणसमुद्राणांतटाःतीराणिअंतोयस्यतन्भुवनश्चकवालंमंडलंजित्वा

यवनाद्विपेषुहरितांसिंहतांद्वेषेदधार।यश्चराजज्ञानांभूपालनरूपक्षत्रियकर्मकर्तृणांदेवेषुसमुदायेषुअग्रणीः श्रेष्ठःस्वया चकानांयेचयाःसमुदायाःस्तेषांस्वर्दुःकल्पवृक्षःशीवाजीनामानृपःछत्रपतिरासीत्॥९०॥यःस्वस्यति।यःषड्गोक्षपृथिवीमिते षण्णवत्यधिकपंचदशमितेस्वस्यउद्भवस्यजन्मनोयोराधशुक्लद्वितीयशुक्लःवैशाखशुक्लप्रतिपद्दिनंतस्मात्सकाशात्तुरं गबुधिसंख्येससप्तचत्वारिंशत्संख्येऽब्देवर्षेस्तिथौयःशालिवाहनशकतस्मिन्आनंदेसंवत्सरेशुक्लशुक्लमदनाहेआषाढशुक्ल नयोर्द्वयोंकाशीस्थितात्गागाभट्टगुरोर्नृपपदेसिंहासनेआप्तुवंराजाभिषेकंमाप्यस्वंशकंप्रावर्तयत्॥९१॥सचेति।स

यःस्वस्योद्भवराधशुक्लद्वितीयशुक्लःवैशाखशुक्लप्रतिपद्दिनंतस्मात्सकाशात्तुरंगांबुधिसंख्याकेस्थितशालिवाहनशकेषड्गोक्षपृथि वीमिते॥आनंदेपिचशुक्लशुक्लमदनाहेमाघ्यकाशीस्थितात्गागाभट्टतआप्तुवंनृपपदेप्रावर्तयत स्वंशकं॥९१॥सतुकोंकणगेरायरिनामनिदुर्गेवसत्स्तौतस्य॥संबाजिर्ज्येष्ठोन्योराजाराममाख्य आसतुःप्रबलौ॥९२॥संबाजेस्तनयोर्भूबलयशाःशाहुःसलक्ष्मानदीसीमानंपरिकल्प्यदक्षिणपयो ध्यंतेधगमंउले॥राजारामस्कृतंचकारनृपतिंकीवेरदिग्गानूत्स्वयंप्रालेयाद्यवधीन्शशासविषयान् सप्तर्षिदुर्गेवसन्॥९३॥ ॥ ॥ ॥ ॥ ॥

सतुकोंकणदेशस्थरायरिनामनिदुर्गेवसत्।अन्यत्स्कगमं॥९२॥संबाजेरिति।संबाजेःशाहुःनामाननयोर्बभूव॥सशाहुःद क्षिणसमुद्रपर्यंतेधरामंउलेराजारामस्कृतंनृपतिंचकार॥स्वयंशाहुस्कृतसप्तर्षिदुर्गेवसन्॥प्रालेयाद्यवधीन्हिमाचलपर्यं तान्कीवेदिग्गान्उत्तरदिशास्थान्विषयान्देशान्शशास।सप्तर्षिदुर्गेसातारइतिभाषायां॥९३॥कोसौराजारामस्कृत्य पेक्षायामाह।राजारामेति।तयोर्मध्येकनिष्ठःसंबाजिःकरविरनामनिपतनेनगरेस्थितःसन्अवनितलंभूमंडलंपाति

स्मररसालदूस्मेहत्मनेनस्ममोगेभूतेलद्॥एतदुक्तंभवति।राजारामस्यद्वौस्फुतौदक्षिणदेशाधिपौतयोर्मध्येकनिष्ठस्फुकरवारे अवसदिति।तस्यात्मजइत्यन्वयि॥९४॥देवीभक्तेति।तस्यसंबाजेरात्मजःपुत्रःशिजिनामानृपआसीदिति।संबंधः।कथंभूतःगुरुपदांभोजयोर्द्वैरेकोभ्रमरःयस्यस्फुनगरेमूर्तिमतीलक्ष्मीःअनिशसदाआस्थितासःशौर्यादार्याभ्यांक्रमातीतरस्फुतौ॥ अर्जुनबलीयेनसःसंसारासक्तोपिपरेपुंसिशिवारूप्यआसक्तमनाअतएवनिदेहेनजकराजेनसदृशः॥९५॥संबाजाति।अ

राजारामस्फुतौशिवाजिरितिविख्यातोग्रजोन्योमहान्संबाजीत्यभिधानआसतुरितिद्वौसार्वभौमौत

र्योः।संबाजिःकरवीरनामविमहालक्ष्म्यालयेपतनेक्षेत्राणांमवरेस्थितोवनितलंपातिस्मतस्यात्मजः॥९४॥ देवीभक्तगणायणीर्गुरुपदांभोजद्वरेफोनिशंलक्ष्मीमूर्तिमतीस्थितास्फुनगरेयस्यद्विजातिप्रियः॥शौर्यादा र्यतिरस्फुतार्जुनबलिःसंसारसक्तःपरेपुंस्यासक्तमनाविदेहसदृशश्चासीछिवाजिर्नृपः॥९५॥संबाजिसं

ज्ञेप्रथमात्मजेस्यतुप्राप्तेद्युलोकंसहसाततोधिरे॥शाहाजिसंज्ञेधरणींप्रशासतिप्रथोयमोयंतुतदाश्रि

स्यशिवाजेःसंबाजिसंज्ञेप्रथमात्मजेजेष्टपुत्रेसहसाअकस्मात्स्फुलोकंस्वर्गंप्राप्तेसतिमृतेसतीत्यर्थः॥ततःतस्मात्अवरेक निष्ठेशहाजिसंज्ञेधरणींपृथ्विंशासतिसतितस्यशहाजेःकुलस्यवाआश्रितस्यकस्यसन्निर्दोषःअयंयंथोयमोयंथोयोग आसादितिशेषः॥९६॥इत्याश्रयवर्णन॥अथकविःस्वकुलंषड्भिराह।श्रीमान्नृसिंहेति।मद्वंशानांतस्यात्मजाइतिचतुर्थस्य तद्वंशेनसंबंधः।यःकाश्यांनगर्यांसंन्यासिनःसकाशात्लब्धायाःगणपतिमायाःगजाननमूर्तेःप्रसादात्हेतोःएतस्मिन्पूर्वो स्फुउर्वीपालान्वयेराजवंशेप्रवरात्श्रेष्ठात्शकस्फुतःशिवाजेःसकाशात्जाशिरायपदवींसमवाप॥९७॥यत्कोंकणेति।प्रथि तंप्रख्यातं।यत्तत्त्यानांसंगमेश्वरपुरवासिनांकर्तीतिकानांज्योतिर्विदांयोवंशःसएवसागरःसमुद्रस्तस्मात्वल्लालसंज्ञ

कोद्विजाधिपोग्रत्मणःश्रेष्ठःअजनिजातःजनेर्लुङः।दीपजनेतिचणप्रत्ययः।जनिवध्योरितिवृध्यिनिषेधः॥९९॥यद्वति। यस्यपुरदैवतंग्रामदैवतमपिजागरूकमातारख्यं।यःशांडिल्योन्वयजःशांडिल्यगोत्रःइभमुखाराध्यःराजाननोपास्य॥९९॥तस्ये ति।तस्यवल्लालस्यबहवआत्मजाःपुत्राबभूवुः।एषांपुत्राणांमध्येदशरथनामानृपमान्याआसीत्।तदीयस्फुतेषुमुख्यश्चिं

अथकवेःकुलवर्णनं॥ ॥श्रीमान्नृसिंहकुलदैवतएकदुर्वीपालान्वयप्रवरतःशकस्फुछिवाजेः॥याजो शिरायपदवींसमवापकाश्यांसन्यासिलब्धगणपप्रतीमात्मसात्॥९७॥त्यत्कोंकणेत्तिप्रथितंतुसंगमे श्वराख्यमत्यंतसमृध्यिमत्पुरं॥तत्रत्यकार्तीतिकवंशसागरात्वल्लालसंज्ञोजनियोद्विजाधिपाः॥९९॥ योदैवज्ञवरःपुरदैवतमपियस्यजागरूकमातारख्यं॥सवरागरोपनामाशांडिल्यान्वयजइभमुखाराध्यः॥ ॥९९॥तस्यात्मजास्फुबहवःप्रबभूवुरेषांमध्येस्फुधीर्दशरथोनृपमान्यआसीत्॥चिंतामणिःकिलतदी यस्फुतेषुमुख्यश्चिंतामणेरपचितिप्रवणोज्ञआसीत्॥४००॥वल्लालस्तस्यपुत्रोग्रजइतरस्फुतोवाजि संज्ञःस्तयोस्फुज्येष्ठोवल्लालनामानृपतिबहुमितोविद्वद्वालीषुमान्यः॥वल्लालार्चैकतानोनरहरिभ जकःकोलदैत्यापहंत्र्यालस्याभस्फुःस्फुकामवरमलयशास्तस्यपुत्रास्फुपंच॥१॥ ॥ ॥

दशरथपुत्रेषुमुख्यश्चिंतामणिनामाचिंतामणेगजाननस्यापचितौपूजायांप्रवणस्तत्परःज्ञोबुधश्चासीत्॥४००॥वल्लाल इति।तस्यचिंतामणेरग्रजोज्येष्ठःपुत्रोवल्लालःइतरस्फुतःकनिष्ठपुत्रोवाजिसंज्ञश्चास्तामितिशेषः।तयोर्मध्येज्येष्ठोवल्लो लनामानृपतिनाबहुयथातथामतःपूजितः।भूतेक्तांतेनसमासः।स्फुस्यचयर्तमानइतिवर्तमानार्थेक्तांतेनषष्ठीसमासनि षेधात्।हेरंबस्यगजाननस्ययाअर्चापतिमापूजावातदेकतानःतदेकनिष्ठःकोलदैत्यापहंत्र्याकोलासुरमथिन्याःकरवी

सा० मं० रवासिन्यासलक्ष्म्याःभक्तःअमलंनिर्दोषंयशोयस्यसोभवत्।तस्यचद्वात्रस्यपंचपुत्राभवन्॥१॥कीदृशाःकेचपुत्राइत्य
पेक्षयाआह।द्विदानिति।विद्वान्दातारामश्चोमान्योरामचंद्रः।अन्यस्तद्वरजोदक्षःकुशलोनारायणाख्यः।तद्वरजोज्योति
र्वित्तमवरःश्रेष्ठोजीवनामा।अन्यःकाणादन्यायशास्त्रंजानातीतिकाणादोराघवनामा।तथाएकःअन्यः।एकेमुख्यान्य
केवलाइत्यमरः॥सजिसंज्ञश्चेतिपंचपुत्राअभवन्नितिपूर्वेणसंबंधः॥२॥स्वकुलंनिरूप्यस्वस्वरूपंनिरूपयति।मस्तेषा
मिति।यच्छब्दस्योत्तरस्तेनसहाजिसंज्ञइत्यत्रतच्छब्देनसंबंधः।तेषांपंचानांमध्येयोवरःकनिष्ठःयश्चस्वज्येष्ठात्राघव

विद्वान्दातारामचंद्रस्याश्चोमान्योद्क्षोन्यस्तुनारायणाख्यः॥जीवोज्योतिर्धरोराघवोन्यःकाणादन्योरा
जिसंज्ञस्तथैकः॥२॥यस्तेषामवरोगजाननपदांभोजद्विरेफोमहालक्ष्मीध्यानपरोनृसिंहचरणासक्तःस
दाचारवान्॥स्वज्येष्ठात्प्रतिलब्धनाटकरसालंकारकाव्यादिकःश्रीसिद्धेश्वरसूनुरामतनुहृन्माताहिशा
श्लोमनः॥३॥सराजिसंज्ञःकिलशालिवाहशकेष्वब्धेराश्वधरामितेत्विषे॥शुक्लेतृतीयारव्यतिथौचकाव्य
वारेसमाप्तामकरोदिमांमुदा॥४॥नरसिंहःकुलदैवतमाराध्यइमाननोमहालक्ष्मीः॥करवीरस्थान्नि
जगज्जननीत्वप्यत्वनेनकाव्येन॥५॥ ॥ ॥ ॥ ॥ ॥

नाम्नःप्रतिलब्धानिप्राप्तानिअधीतानितियावत्।नाटकरसालंकारकाव्यादीनियेनसः।आदिशब्देनज्योतिःशास्त्रादिग्रहःश्री
सिद्धेश्वरस्यमहाराजपरवींप्राप्तात्सूनोःपुत्रात्रामतः।रामनाम्नःसकाशात्साहित्यंयद्हिशास्त्रंव्याकरणशास्त्रंतेनोभतःसर्वेषु
श्रेष्ठाः॥३॥सराजिसंज्ञःअब्धवेदाश्वधरामितेसप्तचत्वारिंशत्यधिकसप्तदशशतमितेशालिवाहशकेइषेआश्विनमासेका
व्यवारेशुक्लवारेसुदाहर्षेणलीलयेतिभावः।इमांसाहित्यमंजूषांसमाप्तामकरोत्॥४॥यत्करोषियद्भासीत्यादिभगवदु

क्तेः।अतियत्नेननिजांयदिदेवतामुभयतश्चयतेजुषतेप्यथमित्यभियुक्तोक्तेश्चस्वकृतंग्रंथंकुलदेवतादिभ्योनिवेदयति॥
नरसिंहइति।कुलदैवतंनरसिंहः।आराध्योगजाननस्यकरवीरस्थास्वनिवासभूतपुराधिदेवतामहालक्ष्मीश्चतेनकाव्ये
नतंस्तुतु॥५॥ ॥७॥यःश्रीखंडकुलांबुधौसमभवद्देवस्यगौरीपतेःपादाब्जेभ्रमरायतेस्मजननीपित्रोस्त्वदासायत॥योवै
याकरणाख्यरत्नमनघेनिबद्धेपुंस्कोकिलायत्नयेत्युल्लस्यभ्जुषामधाच्चनृपतांप्राप्तंनृपान्मान्यतां॥१॥बाजीपंताभिधानस्यालब्ध
जन्मसुपूर्वजः॥व्याधात्साहित्यमंजूषादीपिकांकुंचिकाभिधां॥२॥इतिसाहित्यमंजूषाटीकायांकुंचिकाभिधायांमत्ययनिरूप
णंनामषष्ठोध्यायः॥६॥श्रीसीतारामचंद्रार्पणमस्तु॥ग्रंथसंख्या॥४६१७॥मूळ॥९१०॥टीका॥३७१७॥

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017